ॐस्योनापृथिवि नो भवानृक्क्षरानिवेशनी । यच्छानःशर्म्मसप्रथाः ।
सकल पूजा परिपूर्णार्थे द्रव्य दक्षिणां च समर्पयामि

४।कूर्म पूजनम्

कूर्म पूजाः ईशान

ॐकूर्माय नमः आवाहनम् करोमि
ॐअपारजलधौ त्राता कूर्मरूपः स्वयं हरिः ।
अधिष्ठानं श्रीशेषस्य तस्मै कूर्मात्मने नमः॥

कुशको आसन दिएर

आसनं समर्पयामि । यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव,
सुप्रसन्नो भव,वरदो भव

पञ्चोपचारले कमशः

तव पादयो पाद्यं,हस्तयो अर्घ्यं,मुखे आचमनीयं,सर्वाङ्गे स्नानीयम् समर्पयामि ।
चन्दनं,अक्षतां,पुष्पं च समर्पयामि ।
ॐतँयज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥
सकल पूजा परिपूरणार्थे द्रव्य दक्षिणां च समर्पयामि

दीप पूजनम्

(सामाग्रीःदियो,तेल,वाती,सलाई,कर्मपात्रको जल, कुशको आसन,पञ्चोपचार,चन्दन,अक्षता,पुष्प,पैसा)
दियो यज्ञस्थलको पूर्वमा स्थापना गरिन्छ ।

(दियो जलाएर कर्म पात्रको जलले आवाहन गर्ने)

ॐस्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥
ॐनमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥
दीप नारायणाय नमः

कुशको आसन दिएर

ॐभो दीप ! देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् ।
यावत्पूजासमाप्तिः स्यात्तावदत्र स्थिरो भव ॥
आसनं समर्पयामि । यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव,
सुप्रसन्नो भव,वरदो भव

पञ्चोपचारले कमशः

तव पादयो पाद्यं,हस्तयो अर्घ्यं,मुखे आचमनीयं,सर्वाङ्गे
स्नानीयम् समर्पयामि । गन्धाक्षतपुष्पाणि समर्पयामि ।

ॐपृष्टो दिवि पृष्टोऽअग्निः पृथिव्याम्पृष्टो विश्वाऽओषधीराविवेश ।
वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा स रिषस्पातु नक्तम् ॥

प्रार्थना

ॐशुभं भवतु कल्याणमारोग्यं सुखसम्पदः ।
ज्ञानज्योति प्रकाशाय दीपज्योतिर्नमोऽस्तु ते ॥

गणेश पूजाविधिः

पूर्वमा गणेशको स्थापना हुन्छ ।

सामग्रीः(कर्मपात्रको जल, शुद्धजल,कुशको आसन,पञ्चोपचार, पञ्चामृत यज्ञोपवीत,रातो वस्त्र,चन्दन,अक्षता,दूवो,धूप,दीप,नैवेद्य,लड्डु,ताम्बुल,नरियल,पुष्प,पैसा,ऋतुफल)
(कर्मपात्रको जल हातमा लिएर संकल्प गराउने)

ॐअद्येहेत्यादि.....कर्म निर्वघ्न परिसमाप्त्यर्थं गणेशपूजनमहं करिष्ये ।

गणेशलाई आवाहन गर्ने ।

ॐगणानान्त्वा गणपति गूँ हवामहे प्रियाणान्त्वा प्रियपति गूँ हवामहे निधीनान्त्वा निधिपति गूँ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥
ॐहे हेरम्ब ! त्वमेह्येहि अम्बिकात्र्यम्बकात्मज ।
सिद्धिबुद्धिपते त्र्यक्ष लक्ष्यलाभयितः पितः ॥
नागस्य नागहार त्वं गणराज चतुर्भुजः ।
भूषितैः स्वायुधैर्दिव्यैः पाशाङ्कुशपरस्वधैः ॥
आवाहयामि पूजार्थं रक्षार्थं च मम कृतोः ।
इहागत्य गृहाण त्वं पूजां कृतुं च रक्ष माम् ॥
कमशःआसनम् समर्पयामि.....पाद्यम्,अर्घ्यं,आचमनीयम्,पञ्चामृतम्, शुद्धोदकम्,यज्ञोपवीतम्,वस्त्रम्,चन्दनम्,दूर्वा,अक्षतान्,धूपं,दीपं,नैवेद्यम्,आचमनीयम्, ताम्बूलम्,दक्षिणाम् ।

(ऋतुफल हातमा लिएर स्तुति गरेर फल चढाउने)

ॐरक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक !
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो !
वरदस्त्वं वरं देहि वाञ्चितं वाञ्छितार्थद ॥
इदं फलं प्रियं तुभ्यं अर्पयामि गणाधिप !
अनेन फलदानेन फलदोऽस्तु सदा मम ॥

हातमा पुष्प लिएर प्रार्थना

ॐविघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥
ॐसुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजानन ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संङ्गामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥
वक्रतुण्ड महाकाय कोटिसूर्यसम प्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

इति गणेश पूजाविधिः

कलश पूजा विधिः

ईशानकोणमा कलशस्थापना गर्नु पर्छ ।

सामग्रीः(कर्मपात्रको जल,धान,कुशको आसन,गंगाजल,फल,जौ,
सर्वौषधिः(मुरा,जटामसी,बोझो,कूट,चाँप,मोथे,बेसार,चुत्रो,सर्स्यू,श्रीखण्ड,शिलाजित,तुलसीपत्र)
पञ्चरत्नः(सुन,चाँदी,मुगा,मोती,प्वाँलो)
सप्तमृतिकाः(हात्तिका पाइलाको माटो,घोडाका टापको माटो,बग्गीका पांग्राको माटो,धमिराका गोलाको माटो,तुलसीका फेदको माटो,गाईका गोठको माटो,चौबाटाको माटो)
पञ्चपल्लव(वर,पीपल,आँप,डुम्री र पाखरी)रातो वा पहेंलो वस्त्र,चन्दन,अक्षता,दूवो,पैसा,पुष्प)

कलश स्थापना गरिएको आधारलाई भूमि कल्पना गरेर पूजा गरिन्छ ।

ॐभूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवींयच्छ पृथिवीन्दृ गूँ ह पृथिवीम्मा हि गूँ सीः ॥

धानको पूजा गर्ने ।

ॐधान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनु प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयोसि ॥

धानमाथि कलश स्थापना गर्ने

ॐआजिघ्र कलशम्मह्या त्वा विशन्त्विन्दवः पुनरूर्जा निवर्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥

कलशमा तीर्थको जल वा गङ्गा जल लगाउने

ॐवरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥

ॐसर्वे समुद्राः सरितस्तीर्थानि गलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

कलशमा सर्वौषधि लगाउने

ॐयाऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा ।
मनै नु बभ्रूणामह गूँ शतन्धामानि सप्त च ॥

कलशमा पञ्चरत्न वा पैसा लगाउने

ॐहिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥

कलशमा फल लगाउने

ॐयाः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व गूँ हसः ॥

कलशमा दूवो लगाउने

ॐकाण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥

कलशमा सप्तमृतिका लगाउने

ॐस्योना पृथिवि नो भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथाः ॥

कलशमा वस्त्र अर्पण गर्ने

ॐबृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभाति क्रतुमञ्जनेषु । यद्दीदयच्छवसऽऋतप्रजात
तदस्मासु द्रविणन्धेहि चित्रम् । उपयामगृहीतोसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा॥

कलशमा पूर्णपात्र राख्ने

ॐपूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

कलशमा वरुणदेवतालाई आह्वान गर्ने

ॐतत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुश गूँ स मा नऽआयुः प्रमोषीः ॥

कलशमा निम्नदेवतालाई स्पर्श गरेर आह्वान गर्ने

ॐकलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदःसामवेदोऽप्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥

हातमा पुष्प लिएर कलशको प्रार्थना गर्ने

ॐदेवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पनोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिव स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ।

इति कलश पूजा विधिः

बोधार्थःसाना कर्म गर्दा यहाँ वरण गरेर मात्र अगाडि बढ्नु उचित होला । वरण प्रकिया पृष्ठ .....मा छ ।

नवग्रह पूजा विधिः

ईशान कलशको मुखमा संक्षिप्तरूपमा नवग्रहको पूजा
सामाग्रीः कर्मपात्र,चन्दन,पुष्प र अक्षताको रंग-हरियो,पहेंलो,कालो,सेतो र रातो ।

श्रीकामःशान्तिकामो वा ग्रहयज्ञं समाचरेत् ।

पूर्व

ईशान	बुध	शुक्र	चन्द्र	आग्नेय
उत्तर	वृहस्पति	सूर्य	भौम	दक्षिण
वायव्य	केतु	शनि	राहु	नैऋत्ये

पश्चिम

१।सूर्य /रातो

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं सूर्यमावाहयाम्यहम् ॥

सूर्याय नमः

१।ॐआ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

२।चन्द्र/सेतो

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
ज्योत्स्नापतिं निशानाथं सोममावाहयाम्यहम् ॥

चन्द्राय नमः

२।ॐइमन्देवाऽअसपत्न गूँ सुवध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोस्माकम्ब्राह्मणाना गुँ राजा ॥

३।भौम,मंगल/रातो

धरणीगर्भसम्भूतं विद्युत्तेजसमप्रभम् ।
कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ॥

भौमाय नमः

३।ॐअग्निमूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपा गुँ रेता गुँ सि जिन्वति ॥

४।बुध/हरियो

प्रियङ्गुकलिकाभासं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहम् ॥

बुधाय नमः

४।ॐउद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते स गूँ सृजेथामयञ्च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥

५।गुरु/पहेंलो

देवानां च मुनिनां च गुरुं काञ्चनसन्निभम् ।
वन्द्यभूतं त्रिलोकानां गुरुमावाहयाम्यहम् ॥

गुरवे नमः

५।ॐबृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ।
उपयामगृहितोसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥

६।शुक्र/सेतो

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं शुक्रमावाहयाम्यहम् ॥

शुक्राय नमः

६।ॐअन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँविपान गूँ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥

७शनि/कालो

नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ॥

शनैश्चराय नमः

७।ॐशन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शँयोरभिस्रवन्तु नः ॥

८।राहु/कालो

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसम्भूतं राहुमावाहयाम्यहम् ॥

राहवे नमः

८।ॐकया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ।

९।केतु/कालो

पलाशधूम्रसङ्काशं तारकाग्रहमस्तकम् ।
रौद्ररौद्रात्मकं घोरं केतुमावाहयाम्यहम् ॥

केतवे नमः

९।ॐकेतुङ्कृण्वन्नकेतवे पेशो मर्याऽअपेशसे । समुषद्भिरजायथाः ॥

प्रार्थना

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

रक्षाबन्धन पूजाविधिः

(सामग्रीःकपडा ,रक्षाधागो,जौ,कुश,दूवो,सर्ष्यू,चन्दन,गोबर,बेसार,दही,तिल,अक्षता रक्षाधागो राख्ने पात्र)

(यवान्कुशाँस्तथा दूर्वान्सर्षपान्गन्धमक्षतान् । गोमयं दधिसंयुक्तं कारयेशुद्ध भाजने
वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैश्च सर्षपैः । कृत्वा पोटलिकां पूर्वं बध्नीयादक्षिणे करे ।)

रक्षासूत्र पात्रमा राखेर चन्दन अक्षता पुष्पले पूजा गरेर यज्ञान्तसम्म निरोगिताको लागि यजमानको दाहिने पाखुरामा बाँधिदिने चलन छ । अर्को चलन रक्षधागो पूजा गरेर मूल कलशमाथि राखेर यज्ञ समाप्त भएपछि यजमानलाई बाँधिदिने परम्परा पनि छ ।

पात्रलाई स्पर्श गर्ने

ॐपूर्वे रक्षतु गोविन्द आग्नेयीं धरणीधरः ।
याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋतीम् ॥
वारुणीं केशवो रक्षेत् वायवीं मधुसूदनः ।
उत्तरे श्रीधरो रक्षेदीशानीं तु गदाधरः ॥
ऊर्ध्वं गोवर्धनधरो ह्यधस्तात्तु महीधरः ।
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥
यज्ञाग्रे रक्षताच्शंखः पृष्ठे वै पद्ममुत्तमम् ।
वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः ॥

उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः ।
ऋग्वेदमच्युतो रक्षेद्यजुर्वेदमधोक्षजः ॥
कृष्णो रक्षतु सामानमथर्वाणञ्च माधवः।
उपविष्टाँश्च विप्राँस्ताननिरुद्धोऽभिरक्षतु ॥
यजमानं सपत्नीकं पुण्डरीकाक्ष एव तु ।
रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ॥
(वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैस्तु सर्षपैः ।)

रक्षासूत्रको पूजा गर्ने

ॐरक्षोहणंवलगहनँवैष्णवीमिदमहन्तंवलगमुत्किरामि यम्मे निष्टयो यममात्यो निचखानेदमहन्तंवलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तँ वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तंवलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥
ॐस्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ॥
ॐरक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्त्रक्षोहणो वो वलगहनोऽवनयामि वैष्णवान्त्रक्षोहणो वो वलगहनोऽवस्तृणामि वैष्णवान्त्रक्षोहणौ वां वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवा स्थ ॥
ॐसप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतोलोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥

रक्षासूत्र बाँध्ने श्लोक

ॐजितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥
ॐयेनबद्धो बलीराज दानवेन्द्रो महाबलः ।
तेन त्वामभिबध्नामि रक्षे मा चल मा चल ॥

इति रक्षाबन्धन पूजाविधिः

शंख,घण्टा पूजाविधिः

(सामाग्रीःकर्मपात्र,कुश,चन्दन,तिल,पुष्प) शंखलाई आवाहन गरी कुशको आसन दिने ।

शंखको पूजा

ॐशंखाय नमः आह्वाहितो भव ।
यावत् कर्म भवति तावत्वं सुस्थिरो भव । सुवरदो भव ।
ॐपाञ्चजन्याय विद्यहे पवनाय धीमहि । तन्नो शंखः प्रचोदयात् ॥

चन्दन,तिल,पुष्पले पूजा गर्ने ।

ॐअग्निऋषिःपवमानः पाञ्चजन्यः पुरोहितः तमीमहे महागयम् ।
उपयामगृहीतोस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥

पुष्प हातमा लिएर प्रार्थना गर्ने

ॐत्वं पुरा सागरोत्पन्नो विष्णुना विघृतः करे ।
पूजिता सर्वदेवैश्च पाञ्चजन्य ! नमोऽस्तुते ॥

घण्टाको पूजा

घण्टामा गरुडलाई आह्वान गरी कुशको आसन दिने

ॐघण्टस्थिताय गरुडाय नमः आह्वाहितो भव ।
यावत् कर्म भवति तावत्वं सुस्थिरो भव । सुवरदो भव ।

चन्दन,तिल,पुष्पले पूजा गर्ने

ॐसुपर्णोसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ ।
स्तोमऽआत्मा छन्दा गुँ स्यङ्गानि यजू गुँ षि नाम ।
साम ते तनूर्वामदेव्यँयज्ञायज्ञियम्पुच्छन्धिष्ण्याःशफाः
सुपर्णोसि गरुत्मान्दिवङ्गच्छ स्वः पत ॥
ॐआगमार्थं तु देवानां गमनार्थं च रक्षसाम् ।
कुरु घण्टे वरं नादं देवतास्थानसन्निधौ ॥

इति शंख घण्टा पूजा विधिः

पुण्याहवाचन विधिः

पुण्याहवाचन कलशको सर्वप्रथम कलशपूजा विधिले पुजिएको हुनुपर्छ ।
पुण्याहवाचन कलश यज्ञको आग्नेय कोणमा राखिन्छ ।
(सामग्रीःचन्दन,अक्षता,पुष्प,ताम्बूल,द्रव्य,वस्त्र,फल,पुव्याहवाचन एउटा कलश,लामा कुशका त्यान्द्रा,३दुना आदि)

पुण्याहवाचन प्रक्रिया

(**आशीर्वादेऽभिषेके च पादप्रक्षालने तथा । शयने भोजने चैव पत्नीतूत्तरतो भवेत् ।**)
आशिर्वाद,अभिषेक,पादप्रक्षालन,शयन,भोजनमा पत्नी देब्रे रहन्छिन् ।

यजमानले ब्राह्मणका हातमा पुष्प राखिदिएर भन्नेःपुष्पाणि पान्तु ।
ब्राह्मणले हात थापेर भन्नेः सौमनस्यमस्तु ।
यजमानले ब्राह्मणका हातमा अक्षता राखिदिएर भन्नेःअक्षता पान्तु ।
ब्राह्मणले हात थापेर भन्ने :अरिष्टमक्षतं चास्तु ।
यजमानले ब्राह्मणका हातमा चन्दन राखिदिएर भन्नेःगन्धाः पान्तु ।
ब्राह्मणले हात थापेर भन्नेःसौमङ्गल्यमस्तु ।

यजमानले ब्राह्मणका हातमा फल ताम्बूल राखिदिएर भन्ने:सफलताम्बूलं पान्तु ।
ब्राह्मणले हात थापेर भन्ने:ऐश्वर्यमस्तु ।
यजमानले ब्राह्मणका हातमा दक्षिणा राखिदिएर भन्ने:दक्षिणाः पान्तु ।
ब्राह्मणले हात थापेर भन्ने:बहुदेयञ्चास्तु ।
यजमानले भन्ने तपाईको अनुमति लिएर पुण्याहवाचन गर्छु ।
यजमान भवद्रिनुज्ञातः पुण्याहं वाचयिष्ये ।
ब्राह्मणले भन्ने:वाच्यताम्
(यजमानले पुण्याहवाचन कलश हातमा लिएर आशिष माग्ने)
यजमानः ॐदीर्घानागानद्यो गिरयस्त्रीणि विष्णु पदानी च ।
तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ॥
ब्राह्मणः अस्तु दीर्घमायु ।
यजमानः ॐत्रीणिपदाविचक्रमे विष्णुर्गोपाय अदाभ्यः ।
अतो धर्माणि धारयन् तेनायुः प्रमाणेन पुण्याहं दीर्घायुरस्तु ॥
ब्राह्मणः अस्तु दीर्घायुरस्तु ॥
(ब्राह्मणले लामो कुशले यजमानले लिईराखेको कलशलाई स्पर्श गर्दै निम्न सूक्त पाठ गर्नुपर्छ ।)
ॐदर्भैः स्पृशन्तु कलशं ब्राह्मणैः सह देशिकः ।
ततश्च शुद्धिमन्त्राँस्तु पठेदेवं समाहितः ॥१॥
शुद्धयेऽस्तु परो देवो वासुदेवोऽस्तु शुद्धये ।
सङ्कर्षणः शुद्धयेऽस्तु प्रद्युम्नश्चास्तु शुद्धये ॥२॥
शुद्धयेऽस्त्वनिरुद्धोऽपि केशवश्चापि शुद्धये ।
नारायणोऽस्तु विश्वेश शुद्धये सर्वकर्मणाम् ।३॥
शुद्धये माधवश्चास्तु सर्वलोक हितेरतः ।
गोविन्दः शुद्धये चास्तु परमात्मा सनातनः ॥४॥
शुद्धये विष्णुरस्त्वाद्यः शुद्धये मधुसूदनः ।
सर्वलोकहितो देवः शुद्धयेऽस्तु त्रिविक्रमः ॥५॥
वामनः शुद्धयेचास्तु श्रीधरोऽद्यास्तु शुद्धये ।
शुद्धयेऽस्तु हृषीकेशः पद्मनाभोऽस्तु शुद्धये ॥६॥
सदा दामोदरो देवः शुद्धयेऽस्तु जगत्पतिः ।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदाध्रुवः ॥७॥
अनन्तः शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये ।
सर्वकर्मसु चैवास्तु शुद्धये मधुसूदनः ॥८॥
सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा ।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः ॥९॥

क्रोडात्मा शुद्धयेश्चास्तु शुद्धये बडवानलः ।
शुद्धयेऽस्तु सदा धर्मश्चास्तु वागीश्वरस्तथा ॥१०॥
देव एकार्णवशयः शुद्धयेऽस्तु निरन्तरम् ।
शुद्धयेऽस्तु सदा देवः कूर्मः पातालधारकः ॥११॥
वाराहः शुद्धयेचास्तु नारसिंहोऽस्तु शुद्धये ।
अमृताहरणश्चास्तु शुद्धये सर्वकर्मणाम् ॥१२॥
श्रीमतिः शुद्धये चास्तु शान्तात्मा चास्तु शुद्धये ।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च ॥१३॥
पारिजातहरश्चास्तु लोकनाथोऽस्तु शुद्धये ।
सर्वत्र शुद्धयेचास्तु दत्तात्रेयो महाप्रभुः ॥१४॥
न्यग्रोधशायी भगवान् शुद्धये चाऽस्तु सर्वदा ।
एकश्रृङ्गतनुश्चास्तु वामनश्चास्तु शुद्धये ॥१५॥
त्रिविक्रमः शुद्धयेऽस्तु शुद्धयेऽस्तु नरः सदा ।
नारायणः शुद्धयेऽस्तु हरिः कृष्णश्च शुद्धये ॥१६॥
ज्वलत्परशुधृग्रामः शुद्धयेऽस्तु धनुर्धरः ।
रामश्च शुद्धये चास्तु वेदविद्भगवांस्तथा ॥१७॥
शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयङ्कर ।
शुद्धयेऽस्तु सदा देवः पातालशयनः प्रभुः ॥१८॥
शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा ।
एते सर्वे सदा देवाः शान्तये सन्तु पूजिताः ॥१९॥
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च ।
शिवाय मुक्तये सन्तु वृद्धये सर्वकर्मणाम् ॥२०॥
मन्त्रणां देशिकानाञ्च स्थानानामपि सर्वदा ।
पुत्रमित्र कलत्राणां दासीदासगवामपि ॥२१॥
वेदशास्त्रगमादीनां व्रतानामिष्टसम्पदाम् ।
मनोरथानां सर्वेषां हितानां सन्तु सर्वदा ॥२२॥
आयुरारोग्य मेधानां धनधान्यादिसंपदाम् ।
पुण्यानामणिमादीनां गुणानां श्रेयसामपि ॥२३॥
राज्ञो जनपदस्यापि यजमानस्य मन्त्रिणाम् ।
वैष्णवानां विशेषेण परत्र हितमिच्छताम् ॥२४॥
पञ्चकाल विशुद्धानां सत्वस्थानां शुभात्मनाम् ।
स्वस्त्यस्तु च शिवञ्चास्तु शुभञ्चास्तु पुनः पुनः ॥२५॥

अविघ्नमशिवञ्चास्तु दीर्घमायुष्यमस्तु वै ।
समाहितमनश्चास्तु संपदश्चोत्तरोत्तरम् ॥२६॥
पुण्याहं शुद्धयेचास्तु वासुदेवादि मूर्तयः ।
शंखचक्रगदापद्मयुक्त सर्वेश्वरेश्वरः ॥२७॥
प्रीयतां भगवान्देवो लाङ्गली प्रीयतां सदा ।
प्रद्युम्नः प्रीयतां नित्यमनिरुद्धः सुरेश्वरः ॥२८॥
नारायणः सुरेशोपि कर्मणां पूरणाय च ।
न्यूनाधिकानां शान्त्यर्थं प्रीयतां प्रीयतां विभुः ॥२९॥
पुण्याहं स्वस्ति ऋद्धिं च संवाच्य सहितो द्विजैः ।
आत्मानं प्रोक्षयेत् पश्चात् यागोपकरणानि च ॥३०॥
एनदेवाः पवित्रेणेत्यादि मन्त्रान् पठन् गुरुः ।
एवं सर्वेषु यागेषु कुर्यात् पुण्याह वाचनम् ॥३१॥

(इति पाञ्चरात्रीय सूक्तम्)

(यजमानले कलश पहिलाको स्थानमा राखी तीन वटा खाली दूना आफ्ना अगाडि राख्नु वीचको दूनामा पुण्याहवाचन कलशको जल लगाउने ।
दाहिले तिरको दूनालाई प्रथम पात्र मान्नु र देब्रेतिरको दूनालाई द्वितीय पात्र मान्नु होला) वीचको दूनाको जल पुष्पले निम्न वाक्य बोल्दै प्रथम र द्वितीय पात्रमा जलका छिटा पार्नुहोला ।

प्रथमपात्रः

ॐशान्तिरस्तु । ॐपुष्टिरस्तु । ॐतुष्टिरस्तु ।
ॐसिद्धिरस्तु । ॐअविघ्नमस्तु । ॐआयुष्यमस्तु ।
ॐआरोग्यमस्तु । ॐशिवकर्मास्तु । ॐकर्मसमृद्धिरस्तु ।
ॐवेदसमृद्धिरस्तु । ॐशास्त्रसमृद्धिरस्तु । ॐधनधान्यसमृद्धिरस्तु ॥

द्वितीयपात्रः

अरिष्टनिरसनमस्तु । यत्पापंरोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु ।
उत्तरेकर्मण्यविघ्नमस्तु ।

प्रथमपात्रः

ॐयच्छ्रेयस्तदस्तु ।
ॐउत्तरोत्तरमहरहरभिवृद्धिरस्तु ।
ॐतिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् ।
ॐतिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम् ।
ॐदुर्गापाञ्चाल्यौ प्रीयेताम् ।
ॐअग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् ।
ॐइन्द्रपुरोगामरुद्गणाः प्रीयन्ताम् ।

ॐवशिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् ।
ॐमाहेश्वरी पुरोगा उमामातरः प्रीयन्ताम् ।
ॐअरुन्धती पुरोगा एकपत्यः प्रियन्ताम् ।
ॐब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् ।
ॐविष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् ।
ॐऋषयश्छन्दांस्याचार्यवेदा देवा यज्ञश्च प्रीयन्ताम् ।
ॐब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ।
ॐश्रीसरस्वत्यौ प्रियेताम् । ॐश्रद्धामेधे प्रीयेताम् ।
ॐभगवती कात्यायनीप्रीयताम् । ॐभगवती माहेश्वरी प्रीयताम् ।
ॐभगवती ऋद्धिकरी प्रियताम् । ॐभगवती वृद्धिकरी प्रीयतमा् ।
ॐभगवती पुष्टिकरी प्रीयताम् । ॐभगवती तुष्टिकरी प्रीयताम् ।
ॐभगवन्तौ विघ्नविनायकौ प्रीयेताम् । ॐसर्वाः कुलदेवताः प्रीयताम् ।
ॐसर्वाः ग्रामदेवताः प्रीयताम् । ॐसर्वा इष्टदेवताः प्रीयताम् ।

द्वितीयपात्रः

हताश्च ब्रह्मद्विषः । हताश्च परिपन्थिनः । हताश्च विघ्नकर्तारः ।
शत्रवः पराभवं यान्तु । शाम्यन्तु घोराणि । शाम्यन्तु पापानि ।
शाम्यन्त्वीतयः । शाम्यन्तूपद्रवाः ।

प्रथमपात्रः

ॐशुभानि वर्धन्ताम् । ॐशिवा आपः सन्तु । ॐशिवा ऋतवः सन्तु ।
ॐशिवाओषधयः सन्तु । ॐशिवा वनस्पतयः सन्तु । ॐशिवा अतिथयः सन्तु ।
ॐशिवा अग्नयः सन्तु । ॐशिवा आहुतयः सन्तु । ॐअहोरात्रे शिवे स्याताम् ।
ॐनिकामे निकामेनः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः
पच्यन्ताम् योगक्षेमो नःकल्पताम् ।
ॐशुक्राङ्गारकबुधवृहस्पति शनैश्चरराहुकेतुसोमसहिता
आदित्यपुरोगाः सर्वेग्रहाःप्रीयन्ताम् ।
ॐभगवान् नारायणः प्रीयताम् ।
ॐभगवान्पर्जन्यः प्रीयन्ताम् । स्वामी महासेनः प्रीयन्ताम् ।
(ब्राह्मणले प्रथम पात्रको जल लिएर यजमानलाई निम्न वाक्य उच्चारण गर्न लगाउँदै अभिषेक दिने ।
यजमानले भन्नेः एतत्कल्याणयुक्तं पुण्यं पुण्याहं वाचयिष्ये ।
ब्राह्मणले भन्नेः वाच्यताम् ।
यजमानले भन्नेः ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम् ।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥

यजमानले भन्नेः सकुटुम्बस्य सपरिवारस्य मम अत्र करिष्यमाणस्य
अमुक.....कर्मणःपुण्याहं भवन्तो ब्रवन्तु ३ पटक ।
ब्राह्मणले भन्नेः ॐपुण्याहम् ३ पटक ।
अभिशेक दिनेः ॐपुनन्तुमा देवजनाः पुनन्तु मनसाधियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनिहिमा ॥
यजमानले भन्नेः ॐपृथिव्यां उघृतायांतु यत्कल्याणं पुरा कृतम् ।
ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तुनः ॥
भो ब्राह्मणाः! सकुटुम्बस्य सपरिवारस्य मम अत्र करिष्यमाणस्य
अमुक.....कर्मणः कल्याणं भवन्तो ब्रवन्तु ३ पटक ।
ब्राह्मणले भन्नेः ॐकल्याणम् ३ पटक ।

अभिशेषः

ॐयथेमाँवाचङ्कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्या गुँ शूद्राय
चार्याय च स्वाय चारणाय च । प्रियो देवानान्दक्षिणायै दातुरिह
भूयासमयम्मे कामःसमृध्यतामुप मादो नमतु ॥
यजमानले भन्नेःॐसागरस्य या ऋद्धिर्महालक्ष्म्यादिभिः कृता ।
सम्पूर्णा सुप्रभावा च तामृद्धिं प्रब्रुवन्तु नः ॥
भो ब्राह्मणाः! सकुटुम्बस्य सपरिवारस्य मम अत्र करिष्यमाणस्य
अमुक.....कर्मणः ऋद्धिं भवन्तो ब्रवन्तु ३ पटक ।
ब्राह्मणले भन्नेःॐऋद्यान्ताम् ३ पटक ।

अभिषेकः

ॐसत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम ।
दिवम्पृथिव्याऽअध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ॥
यजमानले भन्नेः ॐस्वस्तिस्तु या विनाशाख्या पुण्यकल्याण वृद्धिदा ।
विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥
भो ब्राह्मणाः! सकुटुम्बस्य सपरिवारस्य मम अत्र करिष्यमाणस्य
अमुक.....कर्मणः स्वस्तिर्भवन्तो ब्रवन्तु ३ पटक ।
ब्राह्मणले भन्नेः ॐआयुष्मते स्वस्ति ३ पटक ।

अभिषेक

ॐस्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
यजमानले भन्नेः समुद्रमथनाज्जात जगदानन्दकारिका ।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥

भो ब्राह्मणाः! सकुटुम्बस्य सपरिवारस्य मम अत्र करिष्यमाणस्य
अमुक.....कर्मणः श्रीरस्तु इति भवन्तो ब्रवन्तु ३ पटक ।
ब्राह्मणले भन्नेः ॐ अस्तु श्रीः ३ पटक ।

अभिषेक

ॐश्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥
यजमानले भन्नेः ॐमृकण्डसूनोरायुर्यत् ध्रुवलोकसमस्तथा ।
आयुषा तेन संयुक्त जीवेमः शरदः शतम् ॥
भो ब्राह्मणाः! सकुटुम्बस्य सपरिवारस्य मम अत्र करिष्यमाणस्य
अमुक.....कर्मणः शतम् जीव भवन्तो ब्रवन्तु ३ पटक ।
ब्राह्मणले भन्नेःॐशतं जीवन्तु भवन्तः ३ पटक ।

अभिषेक

ॐशतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥
यजमानले भन्नेःअस्मिन् पुण्याहवाचने न्युनातिरिक्तो ब्राह्मणवचनात्
श्रीराधासर्वेश्वर प्रसादाच्च परिपूर्णमस्तु ॥

सामूहिक अभिषेश

(पुण्याहवाचन कलशको जल र दाहिले तिरको प्रथमपात्रको जल मिलाएर सबैलाई अभिषेक गरिदिने।)

१।ॐपयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥
२।ॐपञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेभवत्सरित् ॥
३।ॐवरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि
वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥
४।ॐपुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥
५।ॐदेवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि वृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥
६।ॐदेवस्य त्वा सरस्वत्यैव्वाचोयन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ।
७।ॐदेवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनौर्भैषज्येन तेजसे ब्रह्मव्वर्च्चसायाभिषिञ्चामि सरस्वत्यै
भैषज्येनवीर्यायान्नाद्यायाभिषिञ्चामिन्द्रस्येन्द्रियेण बलाय श्रियै यशसे भिषिञ्चामि ॥
८।ॐविश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽआसुव ॥

९।ॐद्यौः शान्तिरन्तरिक्ष गूँ शान्तिःपृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयःशान्तिर्विश्वे देवाःशान्तिर्ब्रह्म शान्तिःसर्व गूँ शान्तिःशान्तिरेव
शान्तिः सा मा शान्तिरेधि ॥
१०।ॐयतोयतःसमीहसे ततो नोऽअभयङ्कुरु ।
शन्नः कुरु प्रजाभ्योभयन्नः पशुभ्यः ॥
११।ॐसरितः सागराः शैलास्तीर्थानि जलदानदाः ।
एतेत्वामभिषिञ्चन्तु सर्व कामार्थ सिद्धये ॥

ब्राह्मण दक्षिणा

हरिॐअद्यकृतैतत्पुण्याहवाचन कर्मणः साङ्गता सिद्ध्यार्थं तत्सम्पूर्ण फल प्राप्त्यर्थं च पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्तिकां दक्षिणां यथाभागं विभज्य दातुमहत्सृजे ।

(द्वितीय पात्रको जल विसर्जन गर्नु होला त्यो अशुद्ध हो ।)

इति पुण्यहावाचन विधि

ब्रह्मा,विष्णु,प्रजापति पूजन

(प्रजापति,ब्रह्मा,विष्णुलाई यज्ञस्थलको दक्षिणबाट उत्तर फर्काएर राख्नुपर्छ ।
सामग्रीःकर्मपात्र,कुशका टुक्रा,पञ्चोपचार,चन्दन,अक्षता,पुष्प,यज्ञोपवीत,पैसा ।

ब्रह्मा पूजा

कर्मपात्रको जलले आवाहन गर्ने ।

ॐब्रह्मणे नमः मया आह्वाहितो भव ।
यावत् पूजां करोमि तावत्वं सुस्थिर भव सुप्रसन्नो वरदो भव ।
कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानियम् समर्पयामि ।
चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामेनिकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्ताँयोगक्षेमो नः कल्पताम् ॥

विष्णु पूजा

कर्मपात्रको जलले आवाहन गर्ने ।

ॐविष्णवे नमः मया आह्वाहितो भव ।
यावत् पूजां करोमि तावत्वं सुस्थिर भवः सुप्रसन्नो वरदो भव ।

कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि, यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
ॐइदँविष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पा गुँ सुरे स्वाहा ।

प्रजापतिको पूजा

कर्मपात्रको जलले आवाहन गर्ने ।

ॐप्रजापतये नमः मया आह्वाहितो भव ।
यावत् पूजां करोमि तावत्वं सुस्थिर भवः सुप्रसन्न वरदो भव ।

कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
ॐप्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वय गुँ स्याम पतयो रयीणाम् ॥

इति ब्रह्मा,विष्णु,प्रजापति पूजा

वेद पूजाविधिः

(क्रम पूर्वमा ऋग्वेद,दक्षिणमा यजुर्वेद,पश्चिममा सामवेद र उत्तरमा अथर्ववेद राखिन्छ ।)
सामग्रीःकर्मपात्र,कुशका टुक्रा,पञ्चोपचार,चन्दन,अक्षता,पुष्प,यज्ञोपवीत,पैसा ।

पूर्वमा ऋग्वेदको पूजा

(कर्मपात्रको जलले आवाहन गर्ने ।)

ॐऋग्वेदाय नमः मया आह्वाहितो भव ।
यावत् पूजां करोमि तावत्वं सुस्थिर भवः सुप्रसन्न वरदो भव ।

कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
१।ॐअग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥(ऋग्वेद प्रथम मन्त्र)

दक्षिणमा यजुर्वेदको पूजा

(कर्मपात्रको जलले आवाहन गर्ने ।)

ॐयजुर्वेदाय नमः मया आह्वाहितो भव ।
यावत् पूजां करोमि तावत्वं सुस्थिरो भवः सुप्रसन्न वरदो भव ।
कुशको आसन दिने:आसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
२।ॐइषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघश गूँ सो ध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्यजमानस्य पशून्पाहि ॥ (यजुर्वेद प्रथम मन्त्र)

पश्चिममा सामवेदको पूजा

(कर्मपात्रको जलले आवाहन गर्ने ।)

ॐसामवेदाय नमः मया आह्वाहितो भव ।
यावत् पूजां करोमि तावत्वं सुस्थिरो भवः सुप्रसन्न वरदो भव ।
कुशको आसन दिने:आसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
३।ॐअग्नऽआयाहि वीतये गृणानोहव्यदातये । निहोता सत्सि वर्हिषि ॥(सामवेद प्रथम मन्त्र)

उत्तरमा अथर्ववेदको पूजा

कर्मपात्रको जलले आवाहन गर्ने ।

ॐअथर्ववेदाय नमःमया आह्वाहितो भव । यावत् पूजां करोमि तावत्वं सुस्थिरो भवः सुप्रसन्न वरदो भव ।
कुशको आसन दिने:आसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्ते अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
४।ॐये त्रिषप्ताः परियन्ति विश्वा रूपाणि विभ्रतः ।
वाचस्पतिर्बला तेषां तन्वोऽअद्य दधातु मे ॥ (अथर्ववेद प्रथम मन्त्र)

विष्वक्सेन पूजा

ईशानमा स्थापना गरिन्छ ।

(सामग्रीःकलशमाथि नरियल वा कुश,पहेंलो वस्त्र,कुश,चन्दन,तिल,पुष्प,पञ्चोपचार,यज्ञोपवीत,पैसा)

(कर्मपात्रको जलले आवाहन गरिन्छ ।)

ॐआवाहयामि सेनेशं शङ्खचक्रगदाधरम् ।
अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥
गजाननादिसहितःसूत्रवत्या सह प्रभो ।
एहि मे देवदेवेश भक्तरक्षणतत्परः ॥
ॐविष्वक्सेनाय नमःमया आह्वाहितो भव । यावत् पूजां करोमि तावत्वं सुस्थिरो भव,सुप्रसन्नो वरदो भव ।
ॐविष्वक्सेनाय विद्महे वेत्रहस्ताय धीमहि तन्नोसेनेश प्रचोदयात् ॥

कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि । चन्दनं समर्पयामि,अक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।
ॐविश्वकर्मन्हविषा वावृधानः स्वयँयजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकम्मघवा सूरिरस्तु ॥

पुष्प हातमा लिएर प्रार्थना गर्ने ।

ॐविष्वक्सेन नमस्तेऽस्तु सर्वेषाञ्च शुभप्रद ।
पुष्पाञ्जलिं मया दत्तं गृहाण गणनायक ॥

इति विष्वक्सेन पूजा

अथ भगवत् समाराधनम्

भगवानको सेवाविधि

(सामाग्रीःपञ्चोपचार पाँचवटा पात्रमा जल सहित तुलसी पत्र,आसन,दूध,दही,घिउ,मह,सखर,पञ्चामृत, वस्त्र,यज्ञोपवीत,चन्दन,तिल,पुष्प,धूप,दीप,नैवेद्य,द्रव्य, आभूषण ।)

अर्चाविग्रह शालाग्राम भगवानको सेवा । प्रतिमा भए प्राण प्रतिष्ठा गर्नु पर्दछ ।

(सुवर्णरौप्यताम्रापाषाणादिमूर्तीनां प्राणप्रतिष्ठां कारयेत् ।)

प्राणप्रतिष्ठा कर्तव्या तस्या देवत्वसिद्धये ।

प्राण प्रतिष्ठा विधिः

ॐअस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयःऋग्यजुसामाथर्वाणि छन्दांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं ह्रीं शक्तिःक्रौं कीलकं अस्यां नूतन प्रतिमायाम् टङ्कघनदहनादिदोषपरिहारार्थं मृत्तिकासंघट्टनादिदोषपरिहारार्थं अग्न्युत्तारणपूर्वकं.....देवस्य प्राणप्रतिष्ठापने विनियोगः ।

विधिःप्रतिमालाई शुद्धपात्रामा राखेर घिऊ,दूध र शुद्धजलले स्नान गराउने,यसलाई अग्न्युत्तारण भनिन्छ ।

घिऊले स्नानः ॐसमुद्रस्यत्वा व कयाग्ने परिव्ययामसि ।
पावकोऽअस्मब्भ्य गुँ शिवोभव ॥

दूधले स्नानः ॐहिमस्यत्वा जरायुणाग्नेपरिव्व्ययामसि ।
पावकोऽअस्मब्भ्य गुँ शिवोभव ॥

शुद्धजलले स्नानःॐप्राणदाऽअपानदाव्व्यानदा व्वर्च्चोदाव्वरिवोदाः ।
अन्न्याँस्तेऽअस्म्मत्त पन्तुहेतयःपावकोऽअस्मब्भ्य गुँ शिवोभव ॥

कर्मपात्रको जलले अभिशेष गरी प्राणप्रतिष्ठा गर्ने ।
हातमा फूल र कुशका टुका लिएर प्रतिमालाई छुने ।

ॐमनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञ गूँ समिमन्दधातु ।
विश्वेदेवासऽइहमादयन्तामोंऽ३प्रतिष्ठा ॥
ॐआँ ह्रीं क्रौं यं रं लं वं शं षं सं हं सः अस्यां मूर्तौ प्राणाः ।
ॐआँ ह्रीं क्रौं यं रं लं वं शं षं सं हं सः अस्यां मूर्तौ जीव इह स्थितः।
ॐआँ ह्रीं क्रौं यं रं लं वं शं षं सं हं सः अस्यां मूर्तौ सर्वेन्द्रियाणि
वाङ्मनस्त्वक्चक्षुश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि
इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।
ॐअस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥ प्राणाः प्रतिष्ठन्तु

प्रार्थना

ॐभगवन्देवदेवेश त्वं पिता सर्वदेहिनाम् ।
येन रूपेण भगवन् त्वया व्याप्तं चराचरम् ॥

इति प्राणप्रतिष्ठा विधिः

कर्ताले आचमन गर्ने ।

ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः

कर्ताले हात धुने । ॐमाधवाय नमः

करन्यासः

ॐक्लीं अंगुष्ठाभ्यां नमः। ॐकृष्णाय तर्जनीभ्यां नमः। ॐगोविन्दाय मध्यमाभ्यां नमः।
ॐगोपीजन अनामिकाभ्यां नमः। ॐवल्लभाय कनिष्ठिकाभ्यां नमः।
ॐस्वाहा करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यासः

ॐक्लीं हृदयाय नमः। ॐकृष्णाय शिरसे स्वहा । ॐगोविन्दाय शिखायै वषट ।
ॐगोपीजन कवचाय हुम् । ॐवल्लभाय नेत्रत्रयाय वौषट् । ॐस्वहा अस्त्राय फट् ।

सृष्टिन्यासः

ॐवासुदेवाय नमः मूर्ध्नि ॐसंकर्षणाय नमः नासाग्रे
ॐप्रद्युम्नाय नमः हृदये ॐअनिरुद्धाय नमः उपस्थे ॐकृष्णाय नमः पादयो ।

संहारन्यास

ॐकृष्णाय नमः पादयो ॐअनिरुद्धाय नमः उपस्थे ॐप्रद्युम्नाय नमः हृदये
ॐसंकर्षणाय नमः नासाग्रे ॐवासुदेवाय नमः मूर्ध्नि

आवाहनम्

ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि गूँ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥
वेदान्तार्थनिवेद्यचिन्मयपरब्रह्मस्वरूपान्वितौ
दिव्यौ नित्यकिशोररूपरुचिरौ गोलोकधामेश्वरौ ।
भक्तानां प्रणयप्रकर्षमभितः संवर्धयन्तौ सदा
श्रीराधामुरलीधरौ मम हृदि क्षेमङ्करौ स्तां चिरम् ॥

ॐराधाकृष्णाभ्यां नमः

आसन

ॐपुरुष एवेद गूँ सर्वंयद्भूतँयच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥
सर्वान्तयामिणो देव सर्वबीजमयंशुभम् ।
स्वात्मस्थाय परं शुद्धं आसनं कल्पयाम्यहम् ॥

ॐराधाकृष्णाभ्यां नमः आसनं समर्पयामि

स्वागतम्

यस्य दर्शनमिच्छन्ति देवाः स्वाभिष्ट सिद्धये ।
तस्मै ते परमेशाय स्वागतं स्वागतं च ते ॥

ॐराधाकृष्णाभ्यां नमः स्वागतम् करोमि

पाद्यम् (चरण प्रक्षालन्)

ॐएतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥
यद्भक्तिलेश सम्पर्कात् परमानन्द संप्लव ।
तस्मै ते परमेशान पाद्यं शुद्धाय कल्पते ॥
ॐराधाकृष्णाभ्यां नमः चरणयोः पाद्यम् समर्पयामि

अर्घ्यं

ॐत्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥
तापत्रयहरं दिव्यं परमानन्दलक्षणम् ।
तापत्रय विनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम् ॥
ॐराधाकृष्णाभ्यां नमः हस्तयोः अर्घ्यं समर्पयामि

आचमनीयम्

ॐततो विराडजायत विराजोऽअधि पूरुषः ।
स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥
उच्छिष्टोप्यशुचिर्वापि यस्यस्मरण मात्रतः ।
शुद्धिमाप्नोति तस्मैतदिदमाचमनीयकम् ॥
ॐराधाकृष्णाभ्यां नमःमुखाम्बुजे आचमनीयम् समर्पयामि

मधुपर्कम्

ॐमधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।
मधु नक्तमुतोषसो मधुमत्पार्थिव गूँ रजः । मधु द्यौरस्तु नः पिता ।
मधुमान्नो वनस्पतिर्मधुमाऽाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु न : ॥
नमः श्रीराधिकेशाय वेदवन्द्य स्वरुपिणे ।
मधुपर्कं गृहाणेमम् गोपीनाथाय ते नमः॥
ॐराधाकृष्णाभ्यां नमः मधुपर्कं समर्पयामि

स्नानीयम्

ॐतस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥
परमानन्द बोधाब्धि निमग्न निजमूर्तये ।
सांगोपांगमिदं स्नानं मल्पयाम्यहमीशते ॥
ॐराधाकृष्णाभ्यां नमः सर्वांगे स्नानं समर्पयामि

दूग्ध स्नानम्

ॐपयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥
कामधेनु समुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥
ॐराधाकृष्णाभ्यां नमः दुग्धस्नानं समर्पयामि, शुद्धजलं च समर्पयामि

दधिस्नानम्

ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्रणऽआयू गुँ षि तारिषत् ॥
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यर्पितं मया देव स्नानार्थं प्रतिगृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः दधिस्नानं समर्पयामि, शुद्धजलं च समर्पयामि

घृतस्नानम्

ॐघृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतँवृषभ वक्षि हव्यम् ॥
नवनीत समुत्पन्नं सर्व संतोष कारकम् ।
घृतं तुभ्यं ददाम्येतत् स्नानाय प्रतिगृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः घृतस्नानं समर्पयामि, शुद्धजलं च समर्पयामि

मधु स्नानम्

ॐमधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।
मधु नक्तमुतोषसो मधुमत्पार्थिव गूँ रजः मधु द्यौरस्तु नः पिता ।
मधुमान्नो वनस्पतिर्मधुमाराँ अस्तु सूर्यः माध्वीगावो भवन्तु न : ॥
तरुपुष्प समुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानाय प्रतिगृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः मधु स्नानं समर्पयामि, शुद्धजलं च समर्पयामि

शर्करा स्नानम्

ॐअपा गुँ रसमुद्वयस गूँ सूर्ये सन्त गूँ समाहितम् । अपा गुँ रसस्य
यो रसस्तँवो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्येष
ते योनिरिन्द्राय त्वा जुष्टतमम् ॥
इक्षुसार समुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः शर्करा स्नानं समर्पयामि, शुद्धजलं च समर्पयामि

पञ्चामृत स्नानम्

ॐपञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेभवत्सरित् ॥
पयोदधिघृतं चैव मधुशर्करयान्वितम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः पञ्चामृत स्नानं समर्पयामि, शुद्धजलं च समर्पयामि

गन्धोदक स्नानम्

ॐअगूँ शुना तेऽअगूँ शुः पृच्यताम्परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसोऽअच्युतः ॥
मलयाचलसम्भूतं चन्दनेन विमिश्रितम् ।
इदं गन्धोदकस्नानं कुंकुमाक्तंस्तु गृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः गन्धोदक स्नानं समर्पयामि, शुद्धजलं च समर्पयामि

भगवानलाई शुद्धवस्त्रले पुछेर सिंहासनमा विराजमान गराउने ।

वस्त्रम्

ॐतस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दा गुँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥
शुद्धाम्बरयुगं दिव्यं सूक्ष्मतन्तुभि निर्मितम् ।
भक्त्या समर्पितं देव प्रसीद परमेश्वर ॥
ॐराधाकृष्णाभ्यां नमः वस्त्रयुग्मं समर्पयामि

भगवानलाई तिलक लगाउने ।

कस्तुरीतिलकं ललाट पटले वक्षस्थले कौस्तुभम्
नासाग्रे वरमौक्तिकं करतले वेणुः करे कंकणम् ।
सर्वांगे हरिचन्दनं सुललितं कण्ठेच मुक्तावलिः
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणि ॥

यज्ञोपवीतम्

ॐतस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥
यस्य शक्तित्रयेणेदं सम्प्रोतमखिलं जगत् ।
यज्ञरूपाय तस्मै ते यज्ञसूत्रं प्रकल्पये ॥
ॐराधाकृष्णाभ्यां नमः यज्ञोपवीतम् समर्पयामि

आभूषणम्

स्वभाव सुन्दरांगाय नाना शक्त्याश्रयाय ते ।
भूषणानि विचित्राणि कल्पयाम्यमरार्चित ॥
ॐराधाकृष्णाभ्यां नमः आभूषणानि समर्पयामि ।

चन्दनम्

ॐतँयज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥
परमानन्द सौरभ्यं परिपूर्ण ! जगन्नुत ! ।
गृहाण परमं गन्धं कृपया जगदीश्वर ! ॥
ॐराधाकृष्णाभ्यां नमः चन्दनम् समर्पयामि ।

तिलाक्षतान्

ॐअक्षन्नमीमदन्त ह्यवप्प्रियाऽअधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्टया मती योजान्विन्द्र ते हरी ॥
ॐतिलाक्षतान् सुरश्रेष्ठ चन्दनेन सुशोभितान् ।
भक्त्यासमर्पितं तुभ्यं गृहाण जगदीश्वर ॥
ॐराधाकृष्णाभ्यां नमः तिलाक्षतान् समर्पयामि

पुष्प/माला

ॐयत्पुरुषँव्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादाऽउच्येते ॥
माल्यदीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः पुष्पमालां समर्पयामि

तुलसीदलानि

तुलसीं हेमरूपां च रुत्नरूपां च मंजरी ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रयाम् ॥
ॐराधाकृष्णाभ्यां नमः तुलसीदलानि समर्पयामि

सुगन्धिद्रव्यम्

तैलादीनि सुगन्धीनि द्रव्याणि विविधानि च ।
मया दत्तानि लेपार्थं गृहाण परमेश्वर ! ॥
ॐराधाकृष्णाभ्यां नमः सुगन्धिद्रव्यम् समर्पयामि

धूपम्

ॐब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या गुँ शूद्रोऽअजायत ॥
वनस्पति रसोत्पन्नो गन्धाढ्यःसुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
ॐराधाकृष्णाभ्यां नमः धूपं आघ्रपयामि

दीपम्

ॐचन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
सुप्रकाशो महादीपः त्रैलोक्यतिमिरापहः ।
सबाह्याभ्यान्तरज्योतिर्दीपोयं प्रतिगृह्यताम् ॥

ॐराधाकृष्णाभ्यां नमः दीपं दर्शयामि

अष्टमहिषी पूजन विधिः

(रुक्मिणी,जाम्बवती,सत्यभामा,कालिन्दी,मित्रविन्दा,नाग्नजिती,भद्रा,लक्ष्मणा)
आठवटा ससाना दुनामा तिल भरेर त्यसमाथि प्रतिमास्वरूप पैसा राखेर त्यसमा अष्ट महिषीलाई आवाहन गरी राधासर्वेश्वरका वरिपरि पूर्वादि क्रमले पूजा गरिन्छ ।
(सामाग्रीःकर्मपात्रको जल,कुश,पञ्चोपचार,चन्दन,तिल,पुष्प,पैसा ।)

१।ॐश्रीरुक्मिण्यै नमः

(कर्मपात्रको जलले आवाहन गर्ने ।)

ॐश्रीरुक्मिण्यै नमः आवाहयामि । स्थापयामि यावत् पूजां करोमि
तावत्वं सुस्थिरा भव । सुप्रसन्ना वरदा भव ।

कुशको आसन दिनेःआसनं समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि,वस्त्रं समर्पयामि,चन्दनं समर्पयामि,तिलाक्षतान् समर्पयामि,पुष्पं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।

यस्तै प्रकारले.....

२।ॐश्रीजाम्बवत्यै नमः ३।ॐश्रीसत्यभामायै नमः ४।ॐश्रीकालिन्द्यै नमः
५।ॐश्रीमित्रविन्दायै नमः ६।ॐश्रीनाग्नजित्यै नमः ७।ॐश्रीभद्रायै नमः
८।ॐश्रीलक्ष्मणायै नमः

इति अष्टमहिषी पूजा विधिः

अष्टसखी पूजनविधिः

(अष्टसखीःरङ्गदेवी,सुदेवी,ललिता,विशाखा,चम्पकला,चित्रा,तुङ्गविद्या,इन्दुलेखा ।
सबै सखी भगवान कै वरिपरी रहने हुनाले मण्डपको मूल कलशका छेउमा ८ ससाना घडा वा दूनामा पैसाको प्रतिमास्वरूप राखेर पूजा गरिन्छ ।)
(सामाग्रीःकर्मपात्रको जल,कुश,पञ्चोपचार,चन्दन,तिल,पुष्प,पैसा ।)

(कर्मपात्रको जलले आवाहन गर्ने ।)

१।ॐरंगदेव्यै नमः आवाहयामि । स्थापयामि यावत् पूजां करोमि
तावत्वं सुस्थिरा भव । सुप्रसन्ना वरदा भव ।

कुशको आसन दिनेःआसनं समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि । वस्त्रं समर्पयामि,चन्दनं समर्पयामि,तिलाक्षतान् समर्पयामि,पुष्पं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।

यस्तै प्रकारले.....

२।ॐसुदेव्यै नमः ३।ॐललितायै नमः ४।ॐविशाखायै नमः
५।ॐचम्पकलतायै नमः ६।ॐचित्रायै नमः ७।ॐतुङ्गविद्यायै नमः
८।ॐइन्दुलेखायै नमः

इति अष्टसखी पूजनविधिः

चतुःसखा पूजाविधिः

(चतुः सखा पनि भगवान कै वरिपरी रहने हुनाले मूल कलश छेउमा चारै दिशामा ससाना घडा वा दुनामा कूर्चा राखेर,पहेंलो वस्त्रमा क्रमशः पूर्वः श्रीदामा,दक्षिणःश्रीसुदामा,पश्चिमःश्रीवसुदामा उत्तरःश्रीकिंकिणि राखिन्छन् ।)

(सामाग्रीःकर्मपात्रको जल,कुश,पञ्चोपचार,चन्दन,यज्ञोपवीत,तिल,पुष्प,पैसा ।)

१।पूर्वः श्रीदाम्ने नमः

(कर्मपात्रको जलले आवाहन गर्ने ।)

पूर्वॐश्रीदाम्ने नमः आवाहयामि । स्थापयामि यावत् पूजां करोमि तावत्वं सुस्थिरो भव । सुप्रसन्नो वरदो भव ।

कुशको आसन दिनेःआसनं समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि,यज्ञोपवीतं समर्पयामि,वस्त्रं समर्पयामि,चन्दनं समर्पयामि,तिलाक्षतान् समर्पयामि,पुष्पं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।

यस्तै प्रकारले.....

दक्षिण२।श्रीसुदाम्ने नमः **पश्चिम**३।श्रीवसुदाम्ने नमः **उत्तर**४।श्रीकिंकणये नमः

इति चतुःसखा पूजाविधिः

चतुर्व्यूह पूजनविधिः

चतुर्व्यूह यज्ञमण्डपको वीच भागको क्रमशः ईशानमा वासुदेव, अग्नयेमा संकर्षण, नैऋत्येमा प्रद्युम्न र वायव्येमा अनिरुद्धको स्थापना हुन्छ ।

सामग्रीःनरियल,(प्रतिमा)वा कुशकूर्चा,कर्मपात्र,कुशका टुक्रा,पञ्चोपचार,चन्दन, तिल,पुष्प,यज्ञोपवीत,पहेंलो वस्त्र,पैसा ।

ईशानमा वासुदेवको पूजा

कर्मपात्रको जलले आवाहन गर्ने।

ॐआवाहयाम्यहं देवं वासुदेवं जगत्पतिम् ।
नीलमेघप्रतीकाशं तडित्प्रभसुवाससम् ॥

स्वागतं ते दीनबन्धो शरणागतवत्सल ।
सद्भावोपस्कृतामर्चा स्वीकुरूष्व दयानिधे ॥
ॐवासुदेवाय नमः लक्ष्मी सहित मया आह्वाहितो भव ।
यावत् पूजां करोमि तावत्वं सुस्थिरो भव,सुप्रसन्नो वरदो भव ।
कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
वस्त्रं समर्पयामि,चन्दनं समर्पयामि,तिलाक्षतान् समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।

आग्नेयकोणमा संकर्षणको पूजा
कर्मपात्रको जलले आवाहन गर्ने ।

ॐआवाहयाम्यहं देवं संकर्षणमनामयम् ।
शतचन्द्रप्रतीकाशं मेघनीलसुवाससम् ॥
एह्येहि करूणासिन्धो सद्भक्तहृदयालय ।
सर्वतापापहरण त्रिवृन्मलविनाशन ॥
ॐसंकर्षणाय नमः सरस्वती सहित मया आह्वाहितो भव । यावत् पूजां करोमि तावत्वं सुस्थिरो भव,सुप्रसन्नो वरदो भव ।
कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
वस्त्रं समर्पयामि,चन्दनं समर्पयामि, तिलाक्षतान समर्पयामि,पुष्पं समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।

नैऋत्यकोणमा प्रद्युम्नको पूजा
कर्मपात्रको जलले आवाहन गर्ने ।

ॐआवाहयाम्यहं देवं प्रद्युम्नं भयनाशनम् ।
दूर्वाङ्कुरदलश्यामं चन्द्रांशुपाण्डुराम्बरम् ॥
एह्येहि देवदेवेश गजदुद्दीपनक्षम ।
क्षेमदायिन् रतिपते सौम्य सद्गुणविग्रह ॥
ॐप्रद्युम्नाय नमः रतिसहित मया आह्वाहितो भव । यावत् पूजां करोमि तावत्वं सुस्थिरो भव,सुप्रसन्नो वरदो भव ।
कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
वस्त्रं समर्पयामि,चन्दनं समर्पयामि, तिलाक्षतान समर्पयामि,पुष्पं
समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।

वायव्येकोणमा अनिरुद्धको पूजा
कर्मपात्रको जलले आवाहन गर्ने ।

ॐआवाहयाम्यहं देवमनिरुद्धं जगद्गुरुम् ।
पद्मपत्राग्रसंकाशं रक्ताम्बरसुशोभितम् ॥
एह्येहि कामतनय सर्वभावमनोहर ।
कर्मसाक्षिञ्जगद्व्यापिन् सर्वभूतदयापर ॥
ॐअनिरुद्धाय नमः प्रीति सहित मया आह्वाहितो भव । यावत् पूजां करोमि तावत्वं
सुस्थिरो भव,सुप्रसन्नो वरदो भव ।

कुशको आसन दिनेःआसनम् समर्पयामि ।

पञ्चोपचारले क्रमशः

तव पादयोः पाद्यं,हस्तयो अर्घ्यं,मुखे आचामनीयम्,सर्वाङ्गे स्नानम् समर्पयामि ।
वस्त्रं समर्पयामि,चन्दनं समर्पयामि, तिलाक्षतान समर्पयामि,पुष्पं
समर्पयामि,यज्ञोपवीतं समर्पयामि,सकल पूजा पूर्णार्थे द्रव्यं च समर्पयामि ।

हातमा पुष्प लिएर प्रार्थना गर्ने

ॐसर्वे पीताम्बरधराः केयूरकुण्डलान्विताः ।
शंखंचकंगदांपद्मं लसद्भुजचतुष्टयाः ॥

इति चतुर्व्यूह पूजनविधिः

नैवेद्यम्

ॐनाभ्याऽआसीदन्तरिक्ष गूँ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथा लोकाँ॥ऽअकल्पयन् ॥
त्वदीयं वस्तु गोविन्द ! तुभ्यमेव समर्पये ।
गृहाण सुमुखो भूत्वा प्रसीद पुरुषोत्तम ! ॥
गोपस्वामि गोकुलेन्द्रो गोवर्धन वरप्रद ।
नन्दादि गोकुलत्राता दाता दारिद्र्यभंजनः ॥
द्विजस्त्रीणां भक्ते मृदुनि विदुरान्ने ब्रजगवां
दधिक्षीरे सख्युःस्फुटचिपिटमुष्टौमधुरिपो ।
यशोदायास्तन्ये व्रजयुवतीदत्ते मधुनि ते
यथासीदामोद ! तमयमुपहारेऽपि कुरुतात् ॥

(कपडाको पर्दा लगाएर)

भोगार्पण प्रार्थना

प्रभो भक्तिले भोग यो सामु ल्यायौं
सबै हो हजुरको हजुरमै चढायौं ।
न ता केही रसीलो र मीठो छ यसमा
भए प्रेम मात्रै भिजेको छ यसमा ॥
हवस् नाथ ज्यूनार आशा उमारी
कृपा गर्नुहोस् भावका हे ! पुजारी ।प्रभो भक्तिले...
न ता भिल्लिनीका बयरझैं छ मीठो
न भो मित्रजीका कनिका सरिको ।
रहर मात्र राखेर टक्र्याउँदै छौं
प्रभो लिदिनोस् पाउमा विन्ति गर्छौं ॥प्रभो भक्तिले..
न मेवा मिठाई सक्यौं गर्न अर्पण
जुट्यो जे जति मात्र भो शुद्ध अर्चन ।
यसैमा रिझी प्रेमको वृष्टि गर्नोस्
सबै भक्तमा दिव्य उत्साह भर्नोस् ॥प्रभो भक्तिले ...

श्रीराधाकृष्णाभ्यां नमः नैवेद्यं समर्पयामि

जलअर्पण

ॐयत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यङ्गीष्मऽइध्मः शरद्धविः ॥
गङ्गाजलं मयानीतं सुवर्ण कलशेस्थितम् ।
आचम्यतां सुरश्रेष्ठमिदमाचमनियकम् ॥

ताम्बूलं

पूगीफलं सकर्पूरं नागवल्लीदलैर्युतम् ।
एलालवंग संयुक्तं ताम्बुलं प्रतिगृह्यताम् ॥

दक्षिणा

ॐन्यायोपार्जितवित्तोयं श्रद्धया सहित प्रभो ।
समर्पितं मया देव ! प्रसन्नो भव सर्वदा ॥

॥ राधाकृष्णाभ्यां नमः सकल पूजा पूर्णार्थे द्रव्य दक्षिणां च समर्पयामि ॥

इति भगवत्समाराधनम्

पुस्तक पूजनविधिः

सामाग्रीः(चन्दन,तिल,पुष्प,तुलसीदल,द्रव्य)
पुस्तकलाई शुद्ध वस्त्रमा राखेर तिल,तुलसीदल,चन्दन,द्रव्यादिले पूजा गर्ने ।
पुस्तकलाई कुशको आसनमा राखेर आह्वान गर्ने ।
ॐपुराण पुरुषोत्तमाय नमःॐवेदपुरुषाय नमः

प्रार्थना

या कुन्देन्दु-तुषारहार-धवला या शुभ्रवस्त्रावृता
या वीणा वरदण्ड मण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माऽच्युत शङ्कर प्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवतीनिःशेषजाड्यापहा ॥

शुक्लां ब्रह्मविचार सार परमामाद्यां गजद्वयापिनीं
वीणा पुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिक मालिकां च दधतिं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥

पुष्प अर्पण गरेर

तिल,तुलसीले अर्चना गर्ने

ॐवेदोसि येन त्वन्देव वेद देवेभ्यो वेदोभवस्तेन मह्यँवेदो भूयाः ।
देवा गातुविदो गातुँवित्वा गातुमित । मनसस्पतऽइमन्देव यज्ञ गुँ स्वाहा वाते धाः ॥
ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

परिशिष्टमा हेर्नुहोला । पृष्ठः

नरियल पुष्पहातमा लिएर प्रार्थना

संसार सागरे मग्नं दीनं मां करुणानिधे ।
कर्ममोहगृहीतांगं मामुद्धर भवार्णवात् ॥
श्रीमद्भागवताख्योऽयं प्रत्यक्ष कृष्ण एव हि ।
स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भव सागरे ॥
मनोरथो मदीयोऽयं सफलः सर्वथात्वया ।
निर्विघ्ने नैव कर्तव्यो दासोऽहं तव केशव ॥
श्रीकृष्ण रुक्मिणीनाथ गोपीजन मनोहर ।
परलोक गतान् जीवान् मोक्षमार्गं प्रदर्शय ॥
इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

वेदको प्रार्थना

ऋग्वेदःश्वेतवर्णः स्यात् द्विभुजो रासभाननः।
अक्षमालायुतः सौम्यः प्रीतश्चाध्ययनोद्यतः॥१॥
अजास्यःपीतवर्णःस्यात् यजुर्वेदऽक्षसूत्रधृक् ।
वामेकुलिशपाणिस्तु भूतिदो मंगलप्रदः ॥२॥
नीलोत्पलदलाभासः सामवेदो हयाननः ।
अक्षमालान्वितोदक्षे वामेकंबुधरःस्मृतः ॥३॥
अथर्वणाभिधो वेदो धवलोमर्कटाननः
अक्षसूत्रंचखट्वाङ्गं विभ्राणो यजनप्रियः॥

फल पुस्तकमा चढाउने ।

इति पुस्तक पूजनविधिः

ब्राह्मण वरणविधिः

(बोधार्थःसप्ताहमा यहाँ आएर ब्राह्मण वरण गरिन्छ ।)

(सामाग्रीःकुश,तिल,वस्त्र,द्रव्य,सुपारी,पञ्चपात्र,चन्दन,अक्षता,पुष्प,यज्ञोपवीत आदि)

(वरणसामाग्रीलाई पूजा गर्ने)

ॐश्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

(कर्मपात्रको जल र कुशका टुक्रा,पुष्प र अक्षता हातमा लिएर संकल्प गर्ने।)

संकल्प

हरिॐतत्सत्,ॐविष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत् सृष्टिकारिणो ब्रह्मणो द्वितीये परार्द्धे श्रीश्वेतवाराहकल्पे सप्तमे वैश्वस्वतमन्वन्तरे बौद्धावतारे अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके भूमण्डलस्य पश्मोत्तर भागे पूर्वतः एट्लान्टिक महासागरःपश्चिमतःपसिफिक महासागरःपरिवेष्टिते,मिसिसिपी,मिसौरीआदि महानदिभिः सिंचिते उत्तरतः हिमशिखरयुक्त पवर्तमालाभिःपरिशोभिते विकसित नगराःग्रामादि सहित पञ्चाशतप्रान्तयुते अमेरिका महादेशान्तर्गत.....राज्ये । ..... .नगरेस्थिते.....ग्रामेस्थिते अस्मिन् गृहे श्रीअर्चाविग्रह शालाग्राम समीपे इह शुद्ध भूमौ ॥ षष्ठि संवत्सराणां मध्ये.....संवत्सरे श्रीसूर्य.....अयने..... ऋतौ.....मासे.....पक्षे.....तिथौ.....वासरे , सूर्यचन्द्रादि नवग्रहाः यथायथा राशिस्थितेषुषत्सु समस्त ग्रहगणविशेषेण विशिष्टान्वितायां शुभपुण्य तिथौ ॥ .....गोत्रस्य.....प्रवरस्य अच्युतगोत्रसमासक्त.....शरणोऽहं मम पत्नी,

पुत्रपौत्रादि समस्तकुटुम्ब सहितस्य संयुक्त रूपेण आयोजितोऽयं .....कर्मण सम्पादनार्थे अस्माभि आवाहितान् सदाचार युक्तान् (आचार्यान्,वाचकान्, पाठकान्,होता,गणपत्यादि मन्त्रजापकान् ,भजनकारिणश्च) नानानाम गोत्रान् ब्राह्मणान् एभिः चन्दन,पुष्प,द्रव्य,बस्त्रादिभिः वयं व्रीणिमहे ।

आरती

(सामाग्रीःआरतीपात्र वात्तिसहित,लाइटर,पात्रमा शुद्धजल,चामर,अर्घ्य(पानी,दूध, कुशका टुका,दही,घिउ,तिल,अक्षता,दूवो।)

आपः क्षीरं कुशाग्राणि दध्याज्यतिलतण्डुलान् ।
दूर्वा सिद्धार्थकं ग्राह्यमष्टाङ्गोऽह्यर्घ्य उच्यते ॥

ॐसप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥
ॐसुवर्ति कर्पूर विदीपितेन सामान्य पात्रे विनियोजितेन ।
निराजयेत्वामहमप्रमेय दिव्येन दीपेन दिवप्रदेन ॥

(धेनुमुद्रा,जलघुमाउने,बत्ती)

श्रितकमला

श्रितकमला मुखमण्डल धृतकुण्डल ए !
कलित ललित वनमाला ! जय जय देव हरे ...
दिनमणिमण्डलमण्डन भव खण्डन ए !
मुनिजन मानस हंस जय जय देव हरे ...
कालिय विषधरगंजन जन रन्जन ए !
यदुकुलनलीनदिनेश जय जय देव हरे ...
मधुमुर नरक विनाशन गरुडासन ए !
सुरकुलकेलिनिदान जय जय देव हरे ...
अमलकमलदललोचन भव मोचन ए !
त्रिभुवनभवननिदान जय जय देव हरे ...
जनकसुताकृतभूषण जितदूषण ए !
समरसमितदशकण्ठ जय जय देव हरे...
अभिनवजलधरसुन्दर धृतमन्दर ए !
श्रीमुखचन्द्रचकोर जय जय देव हरे ...
तव चरणे प्रणता वयमिति भावय ए !
कुरुकुशलं प्रणतेषु जय जय देव हरे...
श्रीजय देवकवेरिदमुदितं कुरुते मुदम्
मंगलमंजुलगीतं जय जय देव हरे ...

पंख/चामर डोलाउने

ॐजयतु जयतु देवो देवकीनन्दनोयम्
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।
जयतु जयतु मेघश्यामलः कोमलांगो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः॥

अर्घ्य समर्पण गर्ने

जातोदैत्यवधर्थाय देवानां पालनाय च ।
तस्मै देवाय सत्याय सगुणाय नमो नमः ॥
व्यक्तव्यक्त स्वरूपाय हृीषिक पतये नमः ।
गृहाणार्घ्यं मया दत्तं राधया सहित प्रभो ॥

शंख जल घुमाउने

शंखमध्येस्थितं तोयं भ्रमित्वा केशवोपरि ।
अंगलग्नं मनुष्याणां सर्वपापं व्यपोहति ॥

पुष्पाञ्जली

वेदान्तार्थनिवेद्यचिन्मयपरब्रह्मस्वरूपान्वितौ
दिव्यौ नित्यकिशोररूपरुचिरौ गोलोकधामेश्वरौ ।
भक्तानां प्रणयप्रकर्षमभितः संवर्धयन्तौ सदा
श्रीराधामुरलीधरौ मम हृदि क्षेमङ्करौ स्तां चिरम् ॥
श्रीहंसं सनकादिकान् सुरऋषिं निम्बार्क देवं गुरूम्
श्रीमद्द्वादश सद्गुरून् श्रुतिपरान् श्रीश्रीनिवासादिकान् ।
वन्दे सुन्दरभट्टदेशिकमुखान् वस्विन्दुसंख्यायुतान्
सर्वाचार्यवरान् गजद्गुरूहरि व्यासात् परान् सादरम् ॥

हे निम्बार्क ! दयानिधे ! गुणनिधे ! हे भक्तचिन्तामणे !
हे आचार्य शिरोमणे ! मुनिगणैरामृग्यपादाम्बुज !
हे सृष्टिस्थितिपालक ! श्रुतिनिधे ! हे नाथ मायाधिप ।
हे गोवर्धनकन्दरालय ! विभो ! मां पाहि सर्वेश्वर ! ॥

ज्ञानस्वरूपञ्च हरेरधीनं शरीरसंयोगवियोगयोग्यम् ।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः ॥१॥

अनादिमायापरियुक्तरूपं त्वेनं विदुर्वै भगवत्प्रसादात् ।
मुक्तं च बद्धं किलबद्धमुक्तं प्रभेदबाहुल्यमथापि बोध्यम् ॥२॥

अप्राकृतं प्राकृतरूपकञ्च कालस्वरूपं तदचेतनं मतम् ।
मायाप्रधानादिपदप्रवाच्यं शुक्लादिभेदाँश्च समेऽपि तत्र ॥३॥

स्वभावतोऽपास्तसमस्तदोष मशेषकल्याणगुणैकराशिम् ।
व्यूहाङ्गिनं ब्रह्म परंवरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥४॥

अङ्गेतुवामे वृषभानुजां मुदा विराजमानामनुरूपसौभगाम् ।
सखीसहस्त्रैः परिसेवितां सदा स्मरेम देवीं सकलेष्टकामदाम् ॥५॥

उपासनीयं नितरां जनैः सदा प्रहाणयेऽज्ञानतमोऽनुवृत्ते ।
सनन्दनाद्यैर्मुनिभिस्तथोक्तं श्रीनारादायाखिलतत्त्वसाक्षिणे ॥६॥

सर्वं हि विज्ञानमतो यथार्थकं श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः।
ब्रह्मात्मकत्वादिति वेदविन्मतं त्रिरूपतापि श्रुतिसूत्रसाधिता ॥७॥

नान्यागतिः कृष्णपदारविन्तात् सन्दृश्यते ब्रह्मशिवाभिवन्दितात् ।
भक्त्येच्छयोपात्तसुचिन्त्यविग्रहा दचिन्त्यशक्तेरविचिन्त्यसाशयात् ॥८॥

कृपास्य दैन्यादियुजि प्रजायते यया भवेत् प्रेमविशेषलक्षणा ।
भक्तिर्ह्यनन्याधिपतेर्महात्मनः सा चोत्तमा साधनरूपिकापरा ॥९॥

उपास्यरूपं तदुपाशकस्य च कृपाफलं भक्तिरसस्ततः परम् ।
विरोधिनो रूपमथैतदाप्तेर्ज्ञेया इमेर्था अपि पञ्च साधुभिः ॥१०॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥

अहो ! दयालो स्वदया वशेन वै प्रपश्य मां प्रापय पादसेवने ।
यथा पुनर्मे विषयेषु माधव रतिर्न भूयाद्धि तथैव साधय ॥

वशीकृतिं यान्ति नहीन्द्रियाणि बुद्धिर्न शुद्धिं समुपैति तस्मात् ।
न साधनं मेस्ति तव प्रसादे दयालुभावेन विना हरे ते ॥

अहो ! बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितांततोन्यं कं वा दयालुं शरणं व्रजेम ॥

वृन्दावनकलानाथौ हृदयानन्दवर्धनौ ।
सुखदौ राधिकाकृष्णौ भजेहं कुञ्जगामिनौ ॥

राधां कृष्णस्वरूपां वै कृष्णंराधास्वरूपिणम् ।
कलात्मनं निकुञ्जस्थं गुरुरूपं सदा भजे ॥

देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु श्रीराधाकृष्णपादब्जरेणवः ॥

जन्मप्रभृति दासोस्मि शिष्योस्मि तनयोस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ! ॥

ॐश्रीहरिचरणकमलवृन्देभ्यो नमः

अथ गुरुपरम्परा

श्रीमद्हंस समारम्भां निम्बभास्कर मध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरु परम्पराम् ॥

हंसस्वरूपं रुचिरं विधाय यः सम्प्रदायस्य प्रवर्तनार्थम् ।
स्वतत्वमाख्यात् सनकादिकेभ्यो नारायणं तं शरणं प्रपद्ये ॥१॥

यदीय पादाब्जयुगाश्रयेण भक्तिवरिष्ठात्ववती विशुद्धा ।
उदञ्चति श्रीभगवत्यजस्रं नमाम्यहं श्रीसनकादिकं तम् ॥२॥

सुधाकरे स्वेच्छतनुत्वभावं स्वर्णोपवीतीत्वमुपैति वासम् ।
प्रवर्तयन्तं हरिभक्तियोगं श्रीनारदं तं शरणं व्रजामि ॥३॥

यत्संप्रदायाश्रयणान्नराणां श्रीराधिका कृष्ण पदारविन्दे ।
प्रेमागरीयान्सहसाभ्युदैति निम्बार्कमेतं शरणं प्रपद्ये ॥४॥

शंखावतारःपुरुषोत्तमस्य यस्यध्वनि शास्त्रमचिन्त्यशक्तिः ।
यत्स्पर्शमात्राद् ध्रुवमाप्तकामस्तं श्रीनिवासं शरणं प्रपद्ये ॥५॥

देवाचार्यहरिव्यासचरणाम्बुजषट्पदम् ।
आचार्यं श्रीस्वभूरामं द्वारमुख्यं नमाम्यहम् ॥६॥

श्रीवत्सवंशजलधेः परिपूर्णचन्द्रम् शान्तस्वरूपममलं भगवत्प्रपन्नं ।
वृन्दावनस्थसनकादिमठावतंसं श्रीमद्ध्रुवाख्य यतिराजमहं नमामि ॥७॥

वत्सान्वयामलपयोनिधिपूर्णचन्द्रम् श्रीमद्ध्रुवाख्ययतिराजपदाब्जभृङ्गम् ।
सत्संस्थया कृतसनातनधर्मरक्षं श्रीकेशवं गुरुमहं शरणं प्रपद्ये ॥ ८॥

भारद्वाजकुलोद्भवं श्रुतिपरं सद्भक्तिसंबर्धकम्
संतसद्गुरुकेशवस्यचरणसरोजभृङ्गंप्रियम् ।
वैदिकस्यसनातनस्य नियमान् सर्वान्सदारक्षकम्
सौम्य भक्तजनाश्रयं गुरुमहं श्रीवासुदेवं भजे॥९॥

श्रीमद्वशिष्ठकुलभूषण सच्चरित्रम् जगत्गुरुं सकलज्ञानयुतं महान्तम् ।
निम्बार्कधर्मपरिवर्धन ज्योतिरूपम् श्रीमोहनं श्रुतिपरं शरणं प्रपद्ये ॥१०॥

आनन्द मानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नतोस्मि ॥

सनकादींस्तथा लक्ष्मीं ब्रह्माणं रुद्रमेव च ।
वन्देहं वैष्णवाचार्यान् संप्रदाय प्रवर्तकान् ॥

प्रह्लादनारदपराशरपुण्डरीक व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
रुक्मांगदार्जुनवशिष्ठविभीषणादीन् पुण्यानिमान् परमभागतान्नमामि ॥

वञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च ।
पतितानां पावनेभ्यो वैष्णवेभ्यो नमो नमः ॥

इमानि पुष्पाणि मनोहराणि सुरासुराणामपिदुर्लभानि ।
कल्पद्रुमादिद्रुमजानितानि पुष्पञ्जलिर्मेऽस्तुसुखाय नित्यं ॥

ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

पुष्पाञ्जलीं समर्पयामि

अर्चना विधि

(तुलसीदल र तिलले अर्चना गर्ने।)

१।ॐश्रीकेशवाय नमः २।ॐश्रीनारायणाय नमः ३।ॐश्रीमाधवाय नमः
४।ॐश्रीगोविन्दाय नमः ५।ॐश्रीविष्णवे नमः ६।ॐश्रीमधुसुदनाय नमः
७।ॐश्रीत्रिविक्रमाय नमः ८।ॐश्रीवामनाय नमः ९।ॐश्रीधराय नमः
१०।ॐश्रीहृषिकेशाय नमः ११।ॐश्रीपद्मनाभाय नमः १२।ॐश्रीदामोदराय नमः
१३।ॐश्रीवासुदेवाय नमः १४।ॐश्रीसंकर्षणाय नमः १५।ॐश्रीप्रद्युम्नाय नमः
१६।ॐश्रीअनिरुद्धाय नमः १७।ॐश्रीअधोक्षजाय नमः १८।ॐश्रीपुरुषोत्तमाय नमः
१९।ॐश्रीनृसिंहाय नमः २०।ॐश्रीअच्युताय नमः २१।ॐश्रीजनार्दनाय नमः
२२।ॐश्रीउपेन्द्राय नमः २३।ॐश्रीहरये नमः २४।ॐश्रीकृष्णाय नमः

.....

१।श्रीराधायै नमः २।श्रीराधिकायै नमः ३।श्रीसर्वेश्वर्यै नमः
४।श्रीयुथेश्वर्यै नमः ५।श्रीब्रजेश्वर्यै नमः ६।श्रीरासेश्वर्यै नमः
७।श्रीपरायै नमः ८।श्रीहरिवल्लभायै नमः ९।श्रीत्रिलोकसुन्दर्यै नमः
१०।श्रीनित्यायै नमः ११।श्रीकिशोर्यै नमः १२।श्रीभक्तवत्सलायै नमः

.....

१।श्रीरूक्मिण्यै नमः २।श्रीजाम्बवत्यै नमः ३।श्रीसत्यभामायै नमः
४।श्रीकालिन्द्यै नमः ५।श्रीमित्राविन्दायै नमः ६।श्रीनाग्नजित्यै नमः
७।श्रीभद्रायै नमः ८।श्रीलक्ष्मणायै नमः

.....

ॐश्रीअस्मद् गुरुभ्यो नमः ॐश्रीअस्मत् परमगुरुभ्यो नमः
ॐश्रीअस्मत्सर्वगुरुभ्यो नमः ॐश्रीमते हंसनारायणाय नमः

ॐश्रीसनकादि ऋषिभ्यो नमः ॐश्रीदेवर्षये नारदाय नमः
ॐश्रीनिम्बार्कमहामुनीन्द्राय नमः ॐश्रीसर्वेभ्यो आचार्यवर्येभ्यो नमः
ॐश्रीमते सर्वेश्वराय नमः।

दण्डवत्

अपराध सहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे ! कृपया केवल मात्मसत्कुरु ॥
जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ! ॥

.....

अग्नि स्थापना विधिः

देश,काल,परिस्थिति अनुसार जुन समयमा हवन गर्नु पर्ने हुन्छ त्यसै समयमा मात्र अग्निको संस्कार गर्नु पर्ने स्थिति देखिएकाले यस विधिमा पनि त्यही प्रक्रिया अपनाइएको छ ।

पञ्च भू संस्कार विधिः

अग्नि स्थापना गर्ने ठाऊँमा पवित्र स्थलको माटो पुजेर ल्याई वेदी बनाउने त्यो (वेदी)भूमिलाई निम्न पाँच प्रकारले शुद्धिकरण गरिन्छः-
(बनिबनाऊ धातुका हवनवेदी भए त्यसैमा विधि पुऱ्याउनु पर्छ ।)
सामग्रीःकर्मपात्रको जल,कुशका त्यन्द्रा,चन्दन,अक्षता,पुष्प,भए गोबर,जलले शुद्धभूमिको पूजा गर्ने ।

१।भूमि पूजा

ॐभूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवींयच्छ पृथिवीन्दृ गूँ ह पृथिवीम्मा हि गूँ सीः ॥

२।माटो उठाउने

ॐअश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे
वनस्पतयश्च मे हिरण्यञ्च मे यश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे
त्रपु च मे यज्ञेन कल्पन्ताम् ॥

३।हवन गर्ने वेदी बनाउने

ॐएष व स्तोमो मरुतऽइयङ्गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयाँविद्यामेषँवृजनञ्जीरदानुम् ॥

४।कुशले वेदी बढार्ने

ॐयद्देवा देवाहेडनन्देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व गूँ हसः ॥

५।कर्मपात्रको जलले शेचन गर्ने वा लिप्ने

ॐमा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्नुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे ॥

इति पञ्च भूः संस्कार विधिः



हवन कुण्डको तस्वीर

देवता स्थापना विधिः

हवन वेदीको पूर्वमा दियो । पूजा विधिः पृष्ठः

हवन वेदीको ईशानमा कलश । पूजा विधिःपृष्ठः

हवन वेदीको पूर्वमा गणेश । पूजा विधिःपृष्ठः

हवन वेदीको दक्षिणमा प्रजापति,ब्रह्मा,र विष्णु । पूजा विधिःपृष्ठः

हवन वेदीको चारै दिशामा चार वेद । पूजा विधिःपृष्ठः

(पूर्व-ऋग्वेद,दक्षिण-यजुर्वेद,पश्चिम-सामवेद,उत्तर-अथर्वेद)

(हवन वेदीका मेखलामा आठवटा दुनामा कुशकूर्चा राखेर पूर्वादिक्रमले अष्टवसु पूजन)

हवन वेदीको उत्तरमा प्रोक्षणी र प्रणीता ।

(यजमान दक्षिणबाट उत्तर फर्केर बस्ने ,ब्राह्मण पूर्व फर्केर बस्ने)

कुण्ड मेखला पूजन विधि

(सामाग्रीःकर्मपात्रको जल,चन्दन,अक्षता,पुष्प)

कुण्डभित्र पद्मको रेखि लगाएर कर्मपात्रको जलले आह्वान गर्दै पूजा गर्ने ।

ॐआधार शक्तये नमः । ॐमूलप्रकृतये नमः । ॐकूर्माय नमः ।

ॐअनन्ताय नमः । ॐपृथिव्यै नमः । ॐक्षीरसिन्धवे नमः ।

ॐश्वेतद्वीपाय नमः । ॐरत्नोज्ज्वलमहामणिमण्डपाय नमः ।

ॐकल्पवृक्षाय नमः ।

कुण्डको बाहिरीभाग मेखलाको पूजा गर्ने ।

सेतो मेखलाःभित्रको (विष्णुरूप) ॐश्वेत मेखलायै सत्वरूपिण्यै नमः ॥

रातो मेखलाःमध्यको (ब्रह्मरूप) ॐरक्त मेखलायै रजोरूपिण्यै नमः ।

कालो मेखलाःवाहिरको (रुद्ररूप) ॐकृष्ण मेखलायै तमोरूपिण्यै नमः ।

इति कुण्डमेखला पूजा विधिः

अष्टवसु पूजा विधिः

सामग्रीःकर्मपात्र,चन्दन,अक्षता,पुष्प

ॐअग्नये नमः अग्निमावाहयामि स्थापयामि पूजयामि ।
ॐजातवेदसे नमः जातवेदसमावाहयामि स्थापयामि पूजयामि ।
ॐसहोजसे नमः सहोजसमावाहयामि स्थापयामि पूजयामि ।
ॐअजिराप्रभवे नमः अजिराप्रभुमावाहयामि स्थापयामि पूजयामि ।
ॐवैश्वानराय नमः वैश्वानरमावाहयामि स्थापयामि पूजयामि ।
ॐनर्यापसे नमः नर्यापसमावाहयामि स्थापयामि पूजयामि ।
ॐपंक्तिराधसे नमः पंक्तिराधसमावाहयामि स्थापयामि पूजयामि ।
ॐविसर्पिणे नमः विसर्पिणमावाहयामि स्थापयामि पूजयामि ।
ॐसुगा वो देवाः सदनाऽअकर्म यऽअजाग्मेद गूँ सवनञ्जुषाणाः ।
भरमाणा वहमाना हवी गुँ ष्यस्मे धत्त वसवो वसूनि स्वाहा ॥

इति अष्टवसु पूजा

प्रोक्षणीपात्र स्थापना

(अग्नि र प्रणिताको विचमा प्रोक्षणी पात्र स्थापना गर्ने)

दुई पवित्र र जल सहित प्रोक्षणीलाई यज्ञकुण्डको उत्तर दिशामा राख्ने ।

ॐइन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम् ॥

प्रणितापात्र स्थापना

दुई पवित्र र जल सहित प्रणिता यज्ञकुण्डको उत्तर दिशामा राख्ने ।

ॐउदुत्तमंवरुण पाशमस्मदवाधमंवि मध्यम गुँ श्रथाय ।
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥

यज्ञको वरिपरि कुश विच्छाउने

ॐये ते शतं वरूणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।
तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

इन्धनशोधन

दाउरा वा वात्तिलाई कर्मपात्रको जलले शुद्ध पार्ने

ॐकस्त्वा सत्यो मदानाम्म गुँ हिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥

समिधा स्थापना

(हवनकुण्डमा समिधा भए निम्न प्रकारले स्थापना गर्ने नभए वाति राख्ने ।)

(पञ्च त्रीणि तथा त्रीणि पुनः पञ्च विधानतः । इति कमेण दारुकं स्थापयित्वा योनिं च कारयेत् ।)

५+५+५+३+३+३+५=२९

ॐत्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वाँवृत्रेष्विन्द्र सत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः ॥

अग्निसंस्कार विधिः

ताबो आदिको पात्रमा अग्निलाई यज्ञकुण्डका समीपमा ल्याएर प्रार्थना गर्ने ।

ॐत्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते ।
आगच्छ भगवन्नग्ने यज्ञेऽस्मन् सन्निधो भव ॥

(अग्निलाई वैष्णवीकरण गराउने कृष्णमन्त्र सुनाउने)

ॐमयि गृह्णाम्यग्रेऽअग्नि गूँ रायस्पोषाय सुप्रजास्त्वाय
सुवीर्याय । मामु देवताः सचन्ताम् ॥

(अग्निका वीचमा रुक्मिणीसंग सर्वेश्वर प्रभुको संयोगको सुचिन्तन गरेर गर्भधारण गरेकी रुक्मिणीका तेजस्वी गर्भको प्रार्थना गर्ने।)

ॐएषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः सऽउ गर्भेऽअन्तः ।
सऽएव जातः स जनिष्यमाणः प्रत्यङ्.जनास्तिष्ठति सर्वतोमुखः ॥

अग्निका १६ संस्कार

सामाग्रीःपात्रामा घीउ,चन्दन,अक्षता र पुष्प

(प्रत्येक संस्कार पछि घृत हवन गर्ने ।)

१।गर्भाधान

ॐअग्नेर्गर्भाधान संस्कारं सम्पादयामि स्वाहा ।
ॐगर्भोऽअस्योषधीनाङ्गर्भो वनस्पतीनाम् ।
गर्भो विश्वस्य भूतस्याग्ने गर्भोऽअपामसि ॥

२।पुंसवन

ॐअग्नेः पुंसवन संस्कारं सम्पादयामि स्वाहा ।
ॐविवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्व । श्रदस्मै नरो वचसे दधातन
यथाशीर्दा दम्पती वाममश्नुतः । पुमान् पुत्रो जायते विन्दते वस्वधा
विश्वाहारपऽएधते गृहे ॥

३।सीमन्तोन्नयन

ॐअग्नेः सीमन्तोन्नयन संस्कारं सम्पादयामि स्वाहा ।
ॐअजीजनो हि पवमान सूर्यविधारे शक्मना पयः । गोजीरया र गूँ हमाणः पुरन्ध्या ॥

४।जातकर्म

ॐअग्नेः जातकर्म संस्कारं सम्पादयामि स्वाहा ।
ॐएजतु दशमास्यो गर्भो जरायुणा सह । यथायंवायुरेजति यथा
समुद्रऽएजति । एवायन्दशमास्योऽअस्रञ्जरायुणा सह ॥

५।नामकरण

ॐअग्नेः नामकरण संस्कारं सम्पादयामि स्वाहा ।
भो अग्ने त्वं.....नामकोऽसि ।
ॐयदापिपेष मातरम्पुत्रः प्रमुदितो धयन् । एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया । सम्पृच स्थ सम्मा भद्रेण पृँक्त विपृच स्थ वि मा पाप्मना पृँक्त ॥

(कर्म विशेष अग्निका नाम)

कर्म	नाम	कर्म	नाम
गर्भाधान	भरत	पुंसवन	भरत
सीमन्त	भरत	जात	भरत
नामकरण	पार्थिव	अन्नप्राशन	शुचि
चूडा	मंगल	उपनयन	समुद्भव
ग्रहशान्ति	सूर्य	विवाह	योजक
चिता	कव्याद	शान्ति	दारुण
पौष्टिक	बलवर्धन	चातुर्थी	शिखी
लक्ष्यहोम	अभीष्टद	कोटीहोम	महाशन
वेदारम्भ	हरि	प्रायश्चित	विधि
पूर्णाहुति	मृडो	अनिष्ट	प्रदायक
दीक्षाग्रहण	कृष्ण	गोलोकोत्सव	कृष्ण

६।निष्क्रमण

ॐ.....नामाग्ने ! तव निष्क्रमण संस्कारं सम्पादयामि स्वाहा ।
ॐपूषा पञ्चाक्षरेण पञ्च दिशऽउदजयत्ताऽउज्जेष गूँ सविताषडक्षरेण षडृतूनुदजयत्तानुज्जेषम्मरुतः सप्ताक्षरेण सप्त ग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम्मित्रो नवाक्षरेण ॥

७।अन्नप्राशन

ॐ.....नामाग्ने ! तव अन्नप्राशन संस्कारं सम्पादयामि स्वाहा ।
ॐअन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्रप्र दातारन्तारिषऽऊर्जन्नो धेहि द्विपदे चतुष्पदे ॥

८।कर्णवेध

ॐ.....नामाग्ने ! तव कर्णवेध संस्कारं सम्पादयामि स्वाहा ।
भद्रङ्कर्णेभिः श्रृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा गुँ सस्तनूभिर्व्यशेमहि देवहितँयदायुः ॥

९।चूडाकरण

ॐ..... नामाग्ने ! तव चूडाकरण संस्कारं सम्पादयामि स्वाहा ।
ॐअग्नऽआयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥

१०।उपनयन

ॐ..... नामाग्ने ! तव उपनयन संस्कारं सम्पादयामि स्वाहा ।
ॐअग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो
मनुष्यानुदजयतान्तानुज्जेषँविष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेष गूँ
सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषम्पूषा पञ्चाक्षरेण ॥

११।गायत्री

ॐभूर्भुवः स्वः वैश्वानराय विद्महे सप्तजिह्वाय धीमहि । तन्नो अग्निः प्रचोदयात् ॥

१२।वेदारम्भ

ॐ.....नामाग्ने ! तव वेदारम्भ संस्कारं सम्पादयामि स्वाहा ।
ॐइषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण
आप्यायध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा वस्तेनऽईशत माघश गूँ
सो ध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्यजमानस्य पशून्पाहि ॥ (यजुर्वेद प्रथम मन्त्र)

१३।समावर्तन

ॐ.....नामाग्ने ! तव समावर्तन संस्कारं सम्पादयामि स्वाहा ।
ॐव्रतङ्कृणुत व्रतङ्कृणुताग्निर्ब्रह्मार्नियज्ञो वनस्पतिर्यज्ञियः ।
दैवीन्धियम्मनामहे सुमृडीकामभिष्टये । वर्चोधाँयज्ञवाहस गूँ
सुतीर्था नोऽअसद्वशे । ये देवा मनोजाता मनोयुजो
दक्षक्रतवस्तेनोवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥

१४।गोदान

ॐ.....नामाग्ने ! तव गोदान कर्म संस्कारं सम्पादयामि स्वाहा ।
गावऽउपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥

१५।विवाह

ॐ.....नामाग्ने ! तव विवाह संस्कारं सम्पादयामि स्वाहा ।
ॐभगऽएव भगवाऽँऽअस्तु देवास्तेन वयम्भगवन्तः स्याम ।
तन्त्वा भग सर्वऽइज्जोहवीति स नो भग पुरऽएता भवेह ॥

अवशिष्ट संस्कार

ॐ..... नामाग्ने ! तव अवशिष्ट संस्कार सम्पादयामि स्वाहा ।

१४।ॐऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रंघर्ममीमहे ।
उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥

१५।ॐवैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री इतो
जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण । उपयामगृहीतोसि
वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥

१६।ॐवैश्वानरो नऽऊतयऽआप्रयातु परावतः अग्निरुक्थेन वाहसा ।
उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥

अग्निलाई कुण्डमा राखेर प्रज्वालन गर्ने ।

ॐस्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥

चन्दन,अक्षता र पुष्पले अग्निको पूजा गर्ने

ॐचत्वारि श्रृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँआ आविवेश ॥

प्रार्थना

ॐआवाहये त्वां पुरुषं महान्तं सुरासुरैर्वन्दितपादपद्मम् ।
ब्रह्मादयो यस्य मुखे वसन्ति प्रविश्य कुण्डे सुरलोकनाथ ॥

इति अग्नि १६ संस्कार

सुरो /श्रुव संस्कार

(सुरो हातमा लिने)

ॐस्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मे
धिषवणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मे
वभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

(यज्ञको अग्निले सुरोलाई तताउने)

ॐपुनन्तुमा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥

(प्रणिताको जलले सुरोलाई सेचन गर्ने)

ॐशन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शँयोरभिस्रवन्तु नः ॥

इति सुरो संस्कार

घृत संस्कार

(सामाग्रीः कांसको पात्रमा घिऊ,दुईवटा पवित्र,कर्मपात्रको जल ।)

घृतस्थापना गरेर तताउने

ॐतेजोसि शुक्रमस्यमृतमसि धामनामासि ।
प्रियं देवानामनाधृष्टन्देवयजनमसि ॥

कर्मपात्रको जलले धृत सेचन गर्ने

ॐप्रत्युष्ट गूँ रक्षः प्रत्युष्टाऽअरातयो निष्टप्त गूँ रक्षो निष्टप्ताऽअरातयः ।
अनिशितोसि सपत्नक्षिद्वाजिनन्त्वा वाजेध्यायै सम्मार्ज्मि ।
प्रत्युष्ट गूँ रक्षः प्रत्युष्टाऽअरातयो निष्टप्त गूँ रक्षो निष्टप्ताऽअरातयः ।
अनिशितासि सपत्नक्षिद्वाजिनीन्त्वा वाजेध्यायै सम्मार्ज्मि ॥

घृतमा दुईवटा पवित्र राख्ने)

ॐविष्णो रराटमसि विष्णोःश्नप्त्रे स्थो विष्णोःस्यूरसि
विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥

इति घृत संस्कार

चरु संस्कार

सामाग्रीः तीनपटक पखालेको चामल,प्रशस्त तिल,**(सर्वकाम समृद्ध्यर्थं तिलाधिक्यं सदैव हि ।)**

(काँसको थालिका चरु ल्याउने)

ॐपशुभिः पशूनाप्नोति पुरोडाशैर्हवी गुँ ष्या ।
छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥

कुश बालेर चरुमाथि घुमाउने

ॐधृष्टिरस्यपाग्नेऽअग्निमामादञ्जहि निष्कव्याद गूँ सेधा
देवयजँवह । ध्रुवमसि पृथिवीन्दृ गूँ ह ब्रह्मवनि त्वा क्षत्रवनि
सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥

चरुमा दुईवटा पवित्र राख्ने

ॐविष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि ।
वैष्णवमसि विष्णवे त्वा ॥

इति चरु संस्कार

तलको मन्त्र पढ्दै अग्निकुण्डमा समिधा थप्ने ।

ॐसमिधाग्निन्दुवस्यत घृतैर्ब्बोधयतातिथिम् । अस्मिन्हब्या जुहोतन ॥

पञ्चवारुणि/प्रायश्चित हवन विधिः

(घिउले मात्र हवन गर्ने,सुरोको घिउ प्रोक्षणीमा प्रक्षेपण गर्ने)

१।ॐप्रजापतय इति प्रजापति ऋषि स्त्रिष्टुप्छन्दःप्रजापतिर्देवता आज्यहोमे विनियोगः ।
ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)

२।ॐइन्द्रायेति प्रजापति ऋषि स्त्रिष्टुप्छन्दः इन्द्रोदेवता आज्यहोमे विनियोगः ।
ॐइन्द्राय स्वाहा । इदं इन्द्राय न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)

३।ॐअग्नय इति प्रजापति ऋषि स्त्रिष्टुप्छन्दः अग्निर्देवता आज्यहोमे विनियोगः ।
ॐअग्नये स्वाहा । इदं अग्नये न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)

४।ॐसोमायेति प्रजापति ऋषि स्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः ।
ॐसोमाय स्वाहा । इदं सोमाय न मम ॥ (**प्रोक्षणीपात्रेऽपि क्षिपेत्**)

५।ॐभूर्भुवःस्वरिति महाव्याहृतीनां प्रजापति ऋषिरग्निवायुसूर्यो देवता
गायत्र्युष्णिगनष्टुभश्छन्दाँसि अग्न्याधाने विनियोगः ।
ॐभूः स्वाहा । इदमग्नये न मम ॥ (**प्रोक्षणीपात्रेऽपि क्षिपेत्**)
ॐभुवः स्वाहा । इदं वायवे न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)
ॐस्वः स्वाहा । इदं सूर्याय न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)

प्रायश्चित हवन (घिउले मात्र)

१।ॐत्वन्नो अग्न इति वामदेव ऋषिरग्नीवरुणौ देवते स्त्रिष्टुप्छन्दः
प्रायश्चित्तहोमे विनियोगः ।
ॐत्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा गुँ सि प्रमुमुग्ध्यस्मत् ॥स्वाहा॥
(इदमग्नीवरुणाभ्यां न मम । प्रोक्षणी पात्रेपि प्रक्षिपेत् ।)

२।ॐस त्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दःअग्निवरुणौ देवते आज्यहोमे विनियोगः ।
ॐस त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ।
अवयक्ष्व नो वरुण गूँ रराणो वीहि मृडीक गूँ सुहवो नऽएधि ॥स्वाहा॥
(इदमग्नीवरुणाभ्यां न मम । प्रोक्षणी पात्रेपि प्रक्षिपेत् ।)

३।ॐअयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः ।
ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि ।
अया नो यज्ञं वहास्यया नो धेहि भेषज गूँ स्वाहा ॥
(इदमग्नये न मम । प्रोक्षणी पात्रेपि प्रक्षिपेत् ।)

४।ॐये ते शतमिति वामदेवऋषि स्त्रिष्टुप्छन्दो वरुणःसविता विष्णुर्विश्वेदेवा मरुतः
स्वर्का देवता प्रायश्चित्तहोमे विनियोगः ।
ॐये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।
ते भिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥
(इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यःस्वर्केभ्यो न मम प्रोक्षणी पात्रेपि प्रक्षिपेत् ।)

५।ॐउदुत्तममिति शुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ।
ॐउदुत्तमँवरुण पाशमस्मदवाधमँवि मध्यम गुँ श्रथाय ।
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥स्वाहा॥

(इदं वरुणाय न मम । प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ॥)

इति पञ्चवारुणी होम

प्रधान हवन

१।ॐकेशवाय नमः स्वाहा
२।ॐनारायणाय नमः स्वाहा
३।ॐमाधवाय नमः स्वाहा
४।ॐगोविन्दाय नमः स्वाहा
५।ॐविष्णवे नमः स्वाहा
६।ॐमधुसूदनाय नमः स्वाहा
७।ॐत्रिविक्रमाय नमः स्वाहा
८।ॐवामनाय नमः स्वाहा
९।ॐश्रीधराय नमः स्वाहा
१०।ॐहृषिकेशाय नमः स्वाहा
११।ॐपद्मनाभाय नमः स्वाहा
१२।ॐदामोदराय नमः स्वाहा
१३।ॐवासुदेवाय नमः स्वाहा
१४।ॐसंकर्षणाय नमः स्वाहा
१५।ॐप्रद्युम्नाय नमः स्वाहा
१६।ॐअनिरुद्धाय नमः स्वाहा
१७।ॐअधोक्षजाय नमः स्वाहा
१८।ॐपुरुषोत्तमाय नमः स्वाहा
१९।ॐनृसिंहाय नमः स्वाहा
२०।ॐअच्युताय नमः स्वाहा
२१।ॐजनार्दनाय नमः स्वाहा
२२।ॐउपेन्द्राय नमः स्वाहा
२३।ॐश्रीहरये नमः स्वाहा
२४।ॐश्रीकृष्णाय नमः स्वाहा

.....

१।ॐश्रीराधायै नमः स्वाहा
२।ॐश्रीराधिकायै नमः स्वाहा
३।ॐश्रीसर्वेश्वर्यै नमः स्वाहा
४।ॐश्रीयुथेश्वर्यै नमः स्वाहा
५।ॐश्रीव्रजेश्वर्यै नमः स्वाहा
६।ॐश्रीरासेश्वर्यै नमः स्वाहा
७।ॐश्रीपरायै नमः स्वाहा
८।ॐश्रीहरिवल्लभायै नमः स्वाहा
९।ॐश्रीत्रिलोकसुन्दर्यै नमः स्वाहा
१०।ॐश्रीनित्यायै नमः स्वाहा
११।ॐश्रीकिशोर्यै नमः स्वाहा
१२।ॐश्रीभक्तवत्सलायै नमः स्वाहा

.....

१।ॐश्रीरूक्मिण्यै नमः स्वाहा
२।ॐश्रीजाम्बवत्यै नमः स्वाहा
३।ॐश्रीसत्यभामायै नमः स्वाहा
४।ॐश्रीकालिन्द्यै नमः स्वाहा
५।ॐश्रीमित्रविन्दायै नमः स्वाहा
६।ॐश्रीनाग्नजित्यै नमः स्वाहा
७।ॐश्रीभद्रायै नमः स्वाहा
८।ॐश्रीलक्ष्मणायै नमः स्वाहा

.....

ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि गूँ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ स्वाहा
ॐपुरुष एवेद गूँ सर्वंयद्भूतँयच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥ स्वाहा
ॐएतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥३॥ स्वाहा
ॐत्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥ स्वाहा
ॐततो विराडजायत विराजोऽअधि पूरुषः ।
स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥ स्वाहा
ॐतस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥ स्वाहा
ॐतस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दा गुँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥ स्वाहा
ॐतस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माञ्जाताऽअजावयः ॥८॥ स्वाहा
ॐतँयज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥९॥ स्वाहा
ॐयत्पुरुषँव्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादाऽउच्येते ॥१०॥ स्वाहा
ॐब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या गुँ शूद्रोऽअजायत ॥११॥ स्वाहा
ॐचन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥ स्वाहा
ॐनाभ्याऽआसीदन्तरिक्ष गूँ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथा लोकाँऽअकल्पयन् ॥१३॥ स्वाहा
ॐयत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥१४॥ स्वाहा
ॐसप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥१५॥ स्वाहा
ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥ स्वाहा

ॐअद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१७॥ स्वाहा
ॐवेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय ॥१८॥ स्वाहा
ॐप्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते ।
तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥१९॥ स्वाहा
ॐयो देवेभ्यऽआतपति यो देवानाम्पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥स्वाहा
ॐरुचम्ब्राह्मञ्जनयन्तो देवाऽअग्रे तदब्रुवन् ।
यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ॥२१॥ स्वाहा
ॐश्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥२२॥ स्वाहा

श्रीनारदपञ्चरात्रोक्त श्रीकृष्णअष्टोत्तरशत नामावलिः

ॐकृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥

(हवन गर्दा नामपद पछि स्वाहा शब्द जोड्नु होला।)

१.ॐश्रीकृष्णाय नमः
२.ॐश्रीकमलानाथाय नमः
३.ॐश्रीवासुदेवाय नमः
४.ॐश्रीसनातनाय नमः
५.ॐश्रीवसुदेवात्मजाय नमः
६.ॐश्रीपुण्याय नमः
७.ॐश्रीलीलामानुसविग्रहाय नमः
८.ॐश्रीश्रीवत्सकौस्तुभधराय नमः
९.ॐश्रीयशोदावत्सलाय नमः
१०.ॐश्रीहरये नमः
११.ॐश्रीचतुर्भुजात्तचक्रासिगदाशङ्खाम्बुजायुधाय नमः
१२.ॐश्रीदेवकीनन्दनाय नमः
१३.ॐश्रीश्रीशाय नमः
१४.ॐश्रीनन्दगोपप्रियात्मजाय नमः
१५.ॐश्रीयमुनावेगसंहारिणे नमः
१६.ॐश्रीबलभद्रप्रियानुजाय नमः
१७.ॐश्रीपूतनाजीवितहरायनमः
१८.ॐश्रीशकटासुरभञ्जनाय नमः
१९.ॐश्रीनन्दव्रजजनानन्दिने नमः
२०.ॐसच्चिदानन्दविग्रहाय नमः
२१.ॐश्रीनवनीतविलिप्ताङ्गाय नमः
२२.ॐश्रीनवनीतनटाय नमः
२३.ॐश्रीअनघाय नमः
२४.ॐश्रीनवनीतनवाहाराय नमः
२५.ॐश्रीमुचुकुन्दप्रसादकाय नमः
२६.ॐश्रीषोडशस्त्रीसहस्रेशाय नमः
२७.ॐश्रीत्रिभङ्गीमधुराकृतये नमः
२८.ॐश्रीशुकवागमृताब्धीन्दवे नमः
२९.ॐश्रीगोविन्दाय नमः

३०.ॐश्रीयोगीनांपतये नमः
३१.ॐश्रीवत्सवाटचराय नमः
३२.ॐश्रीअनन्ताय नमः
३३.ॐश्रीधेनुकासुरमर्दनाय नमः
३४.ॐश्रीतृणीकृत तृणावर्ताय नमः
३५.ॐश्रीयमलार्जुनभंजनाय नमः
३६.ॐश्रीउत्तालतालभेत्रे नमः
३७.ॐश्रीतमालश्यामलाकृतये नमः
३८.ॐश्रीगोपगोपीश्वराय नमः
३९.ॐश्रीयोगिने नमः
४०.ॐश्रीकोटिसूर्यसमप्रभाय नमः
४१.ॐश्रीइलापतये नमः
४२.ॐश्रीपरंज्योतिषे नमः
४३.ॐश्रीयादवेन्द्राय नमः
४४.ॐश्रीयदूद्वहाय नमः
४५.ॐश्रीवनमालिने नमः
४६.ॐश्रीपीतवाससे नमः
४७.ॐश्रीपारिजातापहारकाय नमः
४८.ॐश्रीगोवर्धनाचलोद्धर्त्रे नमः
४९.ॐश्रीगोपालाय नमः
५०.ॐश्रीसर्वपालकाय नमः
५१.ॐश्रीअजाय नमः
५२.ॐश्रीनिरंजनाय नमः
५३.ॐश्रीकामजनकाय नमः
५४.ॐश्रीकञ्जलोचनाय नमः
५५.ॐश्रीमधुघ्ने नमः
५६.ॐश्रीमथुरानाथाय नमः
५७.ॐश्रीद्वारकानाथाय नमः
५८.ॐश्रीबलिने नमः
५९.ॐश्रीवृन्दावनान्तसंचारिणे नमः
६०.ॐश्रीतुलसीदामभूषणाय नमः
६१.ॐश्रीस्यमन्तकमणेहर्त्रे नमः
६२.ॐश्रीनरनारायणात्मकाय नमः
६३.ॐश्रीकुब्जाकृष्टाम्बरधराय नमः
६४.ॐश्रीमायिने नमः
६५.ॐश्रीपरमपुरुषाय नमः
६६.ॐश्रीमुष्टिकासुरचाणुरमल्लयुद्धविशारदाय नमः
६७.ॐश्रीसंसारवैरिणे नमः
६८.ॐश्रीकंसारये नमः
६९.ॐश्रीमुरारये नमः
७०.ॐश्रीनरकान्तकाय नमः
७१.ॐश्रीअनादिब्रह्मचारिणे नमः
७२.ॐश्रीकृष्णव्यसनकर्षकाय नमः
७३.ॐश्रीशिशुपालशिरश्छेत्ते नमः
७४.ॐश्रीदुर्योधनकुलान्तकाय नमः
७५.ॐश्रीविदुराकुरवरदाय नमः
७६.ॐश्रीविश्वरूपप्रदर्शकाय नमः
७७.ॐश्रीसत्यवाचे नमः
७८.ॐश्रीसत्यसंकल्पाय नमः
७९.ॐश्रीजयिने नमः
८०.ॐश्रीशुभद्रापूर्वजाय नमः
८१.ॐश्रीविष्णवे नमः
८२.ॐश्रीभीष्ममुक्तिप्रदाय नमः
८३.ॐश्रीजगद्गुरवे नमः
८४.ॐश्रीजगन्नाथाय नमः
८५.ॐश्रीवेणुनादविशारदाय नमः
८६.ॐश्रीवृषभासुरविध्वंसिने नमः
८७.ॐश्रीबाणासुरकरान्तकाय नमः
८८.ॐश्रीयुधिष्ठिरप्रतिष्ठात्रे नमः
८९.ॐश्रीबर्हिबर्हावतंसकाय नमः
९०.ॐश्रीपार्थसारथये नमः

९१.ॐश्रीअव्यक्ताय नमः ९२.ॐश्रीगीतामृतमहोदधये नमः
९३.ॐश्रीकालीयफणमाणिक्य रंजितश्रीपदाम्बुजाय नमः
९४.ॐश्रीदामोदराय नमः ९५.ॐश्रीयज्ञभोक्त्रे नमः
९६.ॐश्रीदानवेन्द्रविनाशकाय नमः ९७.ॐश्रीनारायणाय नमः
९८.ॐश्रीपरब्रह्मणे नमः ९९.ॐश्रीपन्नगाशन वाहनाय नमः
१००.ॐश्रीजलक्रीडासमासक्तगोपी वस्त्रापहारकाय नमः
१०१.ॐश्रीपुण्यश्लोकाय नमः १०२.ॐश्रीतीर्थपादाय नमः
१०३.ॐश्रीवेदवेद्याय नमः १०४.ॐश्रीदयानिधये नमः
१०५.ॐश्रीसर्वतीर्थात्मकाय नमः १०६.ॐश्रीसर्वग्रहरूपिणे नमः
१०७.ॐश्रीपरात्पराय नमः १०८.ॐश्रीकृष्णाय परब्रह्मणे नमः

श्रीनारदपञ्चरात्रोक्त श्रीराधा अष्टोत्तरशत नामावलिः

हे राधे ! वृषभानु भूपतनये ! हे पूर्णचन्द्रानने !
हे कान्ते ! कमनीयकोकिलरवे ! वृन्दावनाधीश्वरि ! ।
हे मत्प्राणपरायणे च रसिके ! हे सर्वयूथेश्वरि !
आगत्य त्वरितं प्रतप्तमनिशं मां दीनमानन्दय ॥

१.ॐश्रीराधायै नमः २.ॐश्रीराधिकायै नमः
३.ॐश्रीकृष्णवल्लभायै नमः ४.ॐश्रीकृष्णसंयुतायै नमः
५.ॐश्रीवृन्दावनैश्वर्यै नमः ६.ॐश्रीकृष्णप्रियायै नमः
७.ॐश्रीमदनमोहिन्यै नमः ८.ॐश्रीश्रीमत्यै नमः
९.ॐश्रीकृष्णकान्तायै नमः १०.ॐश्रीकृष्णानन्दप्रदायिन्यै नमः
११.ॐश्रीयशस्विन्यै नमः १२.ॐश्रीयशदायिन्यै नमः
१३.ॐश्रीयशोदानन्दबल्लभायै नमः १४.ॐश्रीदामोदरप्रियायै नमः
१५.ॐश्रीगोप्यै नमः १६.ॐश्रीगोपानन्दकर्यै नमः
१७.ॐश्रीकृष्णाङ्गवासिन्यै नमः १८.ॐश्रीहृद्यायै नमः
१९.ॐश्रीहरिकान्तायै नमः २०.ॐश्रीहरिप्रियायै नमः
२१.ॐश्रीप्रधानगोपिकायै नमः २२.ॐश्रीगोपकन्यायै नमः
२३.ॐश्रीत्रैलोक्यसुन्दर्यै नमः २४.ॐश्रीवृन्दावनविहारिण्यै नमः
२५.ॐश्रीविकशितमुखाम्बुजायै नमः २६.ॐश्रीगोकुलानन्दकर्त्र्यै नमः
२७.ॐश्रीगोकुलानन्ददायिन्यै नमः २८.ॐश्रीगतिप्रदायै नमः
२९.ॐश्रीगीतगम्यायै नमः ३०.ॐश्रीगमनागमनसून्यायै नमः
३१.ॐश्रीविष्णुप्रियायै नमः ३२.ॐश्रीविष्णुकान्तायै नमः

३३.ॐश्रीरङ्गनिवासिन्यै नमः
३४.ॐश्रीयशोदानन्दपत्न्यै नमः
३५.ॐश्रीयशोदानन्दगेहिन्यै नमः
३६.ॐश्रीकामारिकान्तायै नमः
३७.ॐश्रीकामेश्वर्यै नमः
३८.ॐश्रीकामलालसविग्रहायै नमः
३९.ॐश्रीजयप्रदायै नमः
४०.ॐश्रीजयायै नमः
४१.ॐश्रीजीवायै नमः
४२.ॐश्रीजीवानन्दप्रदायिन्यै नमः
४३.ॐश्रीनन्दनन्दनपत्न्यै नमः
४४.ॐश्रीवृषभानुसुतायै नमः
४५.ॐश्रीशिवायै नमः
४६.ॐश्रीगणाध्यक्षायै नमः
४७.ॐश्रीगवाध्यक्षायै नमः
४८.ॐश्रीगवांगत्यै नमः
४९.ॐश्रीअनुत्तमायै नमः
५०.ॐश्रीकाञ्चनभायै नमः
५१.ॐश्रीहेमगात्रायै नमः
५२.ॐश्रीकाञ्चनाङ्गदधारिण्यै नमः
५३.ॐश्रीअशोकाय नमः
५४.ॐश्रीशोकरहितायै नमः
५५.ॐश्रीविशोकायै नमः
५६.ॐश्रीशोकनाशिन्यै नमः
५७.ॐश्रीगायत्र्यै नमः
५८.ॐश्रीवेदमात्रे नमः
५९.ॐश्रीवेदातीतायै नमः
६०.ॐश्रीविदुत्तमायै नमः
६१.ॐश्रीनीतिशास्त्रप्रियायै नमः
६२.ॐश्रीनित्यै नमः
६३.ॐश्रीगत्यै नमः
६४.ॐश्रीमत्यै नमः
६५.ॐश्रीअभिष्टदायै नमः
६६.ॐश्रीवेदप्रियायै नमः
६७.ॐश्रीवेदगर्भायै नमः
६८.ॐश्रीवेदमार्गप्रवर्धिन्यै नमः
६९.ॐश्रीवेदगम्यायै नमः
७०.ॐश्रीवेदपरायै नमः
७१.ॐश्रीविचित्रकनकज्वलायै नमः
७२.ॐश्रीउज्वलप्रभायै नमः
७३.ॐश्रीनित्यायै नमः
७४.ॐश्रीउज्वलगात्रिकायै नमः
७५.ॐश्रीनन्दप्रियायै नमः
७६.ॐश्रीनन्दसुताराध्यायै नमः
७७.ॐश्रीआनन्दप्रदायै नमः
७८.ॐश्रीशुभायै नमः
७९.ॐश्रीशुभाङ्ग्यै नमः
८०.ॐश्रीविमलाङ्गायै नमः
८१.ॐश्रीविलासिन्यै नमः
८२.ॐश्रीअपराजितायै नमः
८३.ॐश्रीजननीजन्मशून्यायै नमः
८४.ॐश्रीजन्म मृत्युजरापहायै नमः
८५.ॐश्रीगतिदायै नमः
८६.ॐश्रीगतिमतांधात्र्यै नमः
८७.ॐश्रीधात्रानन्दप्रदायिन्यै नमः
८८.ॐश्रीजगन्नाथप्रियायै नमः
८९.ॐश्रीशैलवासिन्यै नमः
९०.ॐश्रीहेमसुन्दर्यै नमः
९१.ॐश्रीकिशोर्यै नमः
९२.ॐश्रीकमलायै नमः
९३.ॐश्रीपद्मायै नमः
९४.ॐश्रीपद्महस्तायै नमः
९५.ॐश्रीपयोदभायै नमः
९६.ॐश्रीपयश्विन्यै नमः

९७.ॐश्रीपयोदायै नमः
९८.ॐश्रीपवित्रायै नमः
९९.ॐश्रीसर्वमङ्गलायै नमः
१००.ॐश्रीमहाजीवप्रदायै नमः
१०१.ॐश्रीकृष्णकान्तायै नमः
१०२.ॐश्रीकमलसून्यायै नमः
१०३.ॐश्रीविचित्रवासिन्यै नमः
१०४.ॐश्रीचित्रवासिन्यै नमः
१०५.ॐश्रीचित्ररूपिण्यै नमः
१०६.ॐश्रीनिर्गुणायै नमः
१०७.ॐश्रीसुकुलीनायै नमः
१०८.ॐश्रीयोगानन्दकरिण्यै नमः ।

ॐश्रीराधार्पणमस्तु

पार्षद हवन

१।ॐश्रीरंगदेव्यै नमः । २।ॐश्रीसुदेव्यै नमः । ३।ॐश्रीललितायै नमः ।
४।ॐश्रीविशाखायै नमः ५।ॐश्रीचम्पकलतायै नमः । ६।ॐश्रीचित्रायै नमः ।
७।ॐश्रीतुंगविद्यायै नमः । ८।ॐश्रीइन्दुलेखायै नमः । ९।ॐविमलायै नमः ।
१०।ॐउत्कर्षिण्यै नमः । ११।ॐज्ञानायै नमः । १२।ॐक्रियायै नमः ।
१३।ॐयोगायै नमः । १४।ॐसत्यायै नमः । १५।ॐप्रह्वायै नमः ।
१६।ॐईशानायै नमः । १८।ॐअनुग्रहायै नमः । १९।ॐतुलस्यै नमः ।
१।ॐश्रीश्रीदाम्ने नमः । २।ॐश्रीसुदाम्ने नमः । ३।ॐश्रीवसुदाम्ने नमः ।
४।ॐश्रीकिंकिणये नमः । ५।ॐश्रीबलभद्राय नमः । ६।ॐश्रीसुभद्रायै नमः ।
७।ॐश्रीविष्वक्सेनाय नमः ।८।ॐश्रीसर्वेभ्यो गणाधिपेभ्यो नमः ।
९।ॐश्रीगरुडाय नमः । १०।ॐश्रीदिव्यधाम्ने श्रीगोलोकाय नमः ।
११।ॐश्रीनन्दगोपाय नमः । १२।ॐश्रीयशोदायै नमः १३।ॐश्रीगोपेभ्यो नमः ।
१४।ॐश्रीगोपीभ्यो नमः । १५।ॐश्रीवसुदेवाय नमः । १६।ॐश्रीदेवक्यै नमः ।
१७।ॐश्रीनन्दाय नमः । १८।ॐश्रीसुनन्दाय नमः । १९।ॐश्रीचण्डाय नमः ।
२०।ॐश्रीप्रचण्डाय नमः । २१।ॐश्रीबलाय नमः । २२।ॐश्रीमहाबलाय नमः ।
२३।ॐश्रीकुमुदाय नमः । २४।ॐश्रीकुमुदेक्षणाय नमः । २५।ॐश्रीहनुमते नमः ।
२६।ॐश्रीव्यासाय नमः । २७।ॐश्रीदुर्गायै नमः । २८।ॐश्रीविनायकाय नमः ।
२९।ॐश्रीअस्मद् गुरुभ्यो नमः । ३०।ॐश्रीअस्मत् परमगुरुभ्यो नमः ।
३१।ॐश्रीअस्मत्सर्व गुरुभ्यो नमः । ३२।ॐश्रीमते हंसनारायणाय नमः
३३।ॐश्रीसनकादि ऋषिभ्यो नमः ३४।ॐश्रीदेवर्षये नारदाय नमः
३५।ॐश्रीनिम्बार्क महामुनीन्द्राय नमः ३६।ॐश्रीसर्वेभ्यो आचार्यवर्येभ्यो नमः।
३७।ॐश्रीसुरेभ्यो नमः । ३८।ॐश्रीमन्दराय नमः ।
३९।ॐश्रीसन्तानाय नमः । ४०।ॐश्रीपारिजाताय नमः ।
४१।ॐश्रीकल्पवृक्षाय नमः । ४२।ॐश्रीहरिचन्दनाय नमः ।

४३।ॐश्रीसर्वेभ्यो पितृभ्यो नमः । ४४।ॐइन्द्राय नमः । ४५।ॐअग्नये नमः ।
४६।ॐयमाय नमः । ४७।ॐनिऋतये नमः । ४८।ॐवरुणाय नमः ।
४९।ॐवायवे नमः । ५०।ॐसोमाय नमः । ५१।ॐईशानाय नमः ।
५२।ॐशेषाय नमः । ५३।ॐब्रह्मणे नमः । ५४।ॐवज्राय नमः ।
५५।ॐशक्तये नमः । ५६।ॐदण्डाय नमः । ५७।ॐखड्गाय नमः ।
५८।ॐपाशाय नमः । ५९।ॐअङ्कुशाय नमः । ६०।ॐगदायै नमः ।
६१।ॐत्रिशूलाय नमः । ६२।ॐचक्राय नमः । ६३।ॐपद्माय नमः ।

दिव्य आयुध हवन

१।ॐश्रीचक्रराजाय सुदर्शनाय नमः । २।ॐपाञ्चजन्याय शंखाय नमः ।
३।ॐश्रीकौमोदक्यै गदायै नमः । ४।ॐश्रीदिव्याय पद्माय नमः ॥
५।ॐवेणवे नमः ६।ॐकौस्तुभाय नमः ७।ॐवनमालायै नमः
८।ॐश्रीवत्साय नमः ९।ॐश्रीपीताम्बराय नमः १०।ॐकिरिटाय नमः
११।ॐनन्दकाय नमः १२।ॐशार्ङ्गिणे नमः १३।ॐइषवे नमः
१४।ॐहलाय नमः १५।ॐमुशलाय नमः

आधार हवन

१।ॐआधारशक्त्यै नमः २।ॐमूलप्रकृत्यै नमः
३।ॐकूर्मरूपिणे नारायणाय नमः ४।ॐवाराहाय नमः
५।ॐआसनभूताय अष्टदलकमलाय नमः ६।ॐपीठात्मकाय अनन्ताय नमः
७।ॐधर्मादि पीठपादेभ्यो नमः ८।ॐअधर्मादि पीठगात्रेभ्यो नमः
९।ॐऋग्वेदादि पीठवाहकेभ्यो नमः १०।ॐद्वादशकलात्मकाय सूर्यमण्डलाय नमः
११,ॐषोडशकलात्मकाय सोममण्डलाय नमः १२,ॐदशकलात्मकाय अग्निमण्डलाय नमः

पाञ्चायन देवता हवन

१।ॐगणानान्त्वा गणपति गूँ हवामहे प्रियाणान्त्वा प्रियपति गूँ हवामहे
निधीनान्त्वा निधिपति गूँ हवामहे वसो मम । आहमजानि गर्भधमा
त्वमजासि गर्भधम् ॥स्वाहा॥
२।ॐआ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥स्वाहा॥
३।ॐदेवीर्द्वारऽइन्द्र गूँ सङ्घाते वीड्वीर्यामन्नवर्धयन् । आवत्सेन तरुणेन कुमारेण
च मीवता पार्वाण गूँ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥ स्वाहा ॥
४।ॐनमः शम्भवाय च मयो भवाय च नमः शंकराय च मयस्कराय च नमः ।
शिवाय च शिवतराय च ॥स्वाहा॥

५।ॐविष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि
विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ॥ स्वाहा॥

नवग्रह हवन

१।ॐआ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥स्वाहा इदं सूर्याय
२।ॐइमन्देवाऽअसपत्न गूँ सुवध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते
जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा
सोमोस्माकम्ब्राह्मणाना गुँ राजा ॥ स्वाहा इदं सोमाय
३।ॐअग्निमूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपा गुँ रेता गुँ सि जिन्वति ॥
स्वाहा इदं भौमाय
४।ॐउद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते स गूँ सृजेथामयञ्च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥ स्वाहा इदं बुधाय
५।ॐबृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ।
उपयामगृहितोसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥ स्वाहा इदं बृहस्पतये
६।ॐअन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँविपान गूँ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥
स्वाहा इदं शुक्राय
७।ॐशन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ।शँयोरभिस्रवन्तु नः॥
स्वाहाइ दं शनैश्चराय
८।ॐकया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ।
स्वाहा इदं राहवे
९।ॐकेतुङ्कृण्वन्नकेतवे पेशो मर्याऽअपेशसे । समुषद्भिरजायथाः ॥स्वाहा इदं केतुभ्यो

स्थापिता देवता

दीप

ॐपृष्टो दिवि पृष्टोऽअग्निः पृथिव्याम्पृष्टो विश्वाऽओषधीराविवेश ।
वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा स रिषस्पातु नक्तम् ॥स्वाहा॥

कलश

ॐआजिघ्र कलशम्मह्या त्वा विशन्त्विन्दवः ।
पुनरूर्जा निवर्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥स्वाहा॥

गणेश

ॐगणानान्त्वा गणपति गूँ हवामहे प्रियाणान्त्वा प्रियपति गूँ हवामहे निधीनान्त्वा निधिपति गूँ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥स्वाहा॥

विष्वक्सेन

ॐविश्वकर्मन्हविषा वावृधानः स्वयँयजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकम्मघवा सूरिरस्तु ॥स्वाहा॥

ब्रह्मा

ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामेनिकामे नः पर्जन्यो वर्षतु फलवत्यो न ऽओषधयः पच्यन्ताँयोगक्षेमो नः कल्पताम् ॥स्वाहा॥

विष्णु

ॐइदँविष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पा गुँ सुरे स्वाहा ।

प्रजापति

ॐप्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वय गुँ स्याम पतयो रयीणाम् ॥ स्वाहा॥

ऋग्वेद

ॐअग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ।होतारं रत्नधातमम् ॥स्वाहा॥(ऋग्वेद प्रथम मन्त्र)

यजुर्वेद

ॐइषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघश गूँ सो ध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्यजमानस्य पशून्पाहि ॥ स्वाहा॥(यजुर्वेद प्रथम मन्त्र)

सामवेद

ॐअग्नऽआयाहि वीतये गृणानोहव्यदातये । निहोता सत्सि वर्हिषि ॥स्वाहा॥(सामवेदप्रथममन्त्र)

अथर्ववेद

ॐये त्रिषप्ताः परियन्ति विश्वा रूपाणि विभ्रतः ।
वाचस्पतिर्बला तेषां तन्वोऽअद्य दधातु मे ॥स्वाहा॥ (अथर्ववेद प्रथम मन्त्र)

शंख

ॐअग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ।
उपयामगृहीतोस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥ स्वाहा॥

घण्टा

ॐसुपर्णोसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽआत्मा छन्दा गुँ स्यङ्गानि यजू गुँ षि नाम । साम ते तनूर्वामदेव्यँयज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः । सुपर्णोसि गरुत्मान्दिवङ्गच्छ स्वः पत ॥ स्वाहा॥

अष्टवसु

ॐसुगा वो देवाः सदनाऽअकर्म य आजग्मेद गूँ सवनञ्जुषाणाः ।
भरमाणा वहमाना हवी गुँ ष्यस्मे धत्त वसवो वसूनि ॥स्वाहा ॥ अष्टवसुभ्यो नमः ॥

भू

ॐभूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीन्दृ गूँ हपृथिवीं मा हि गूँ सीः ॥स्वाहा॥

वराह

ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥स्वाहा॥

अनन्त

ॐस्योनापृथिवि नो भवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्रथाः ॥स्वाहा॥

कूर्म

ॐतँयज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥स्वाहा॥

विशेष कर्मको थप हवन भए यहाँ गर्नुपर्छ ।

चतुः स्वस्त्यादि हवन

ॐचतुस्वस्तिभ्यः स्वाहा । ॐपयः पञ्चेभ्यः स्वाहा । ॐषड्विष्णुभ्यः स्वाहा ।
ॐपञ्चपाण्डवेभ्यः स्वाहा । ॐषट्वातेभ्यः स्वाहा । ॐत्र्यनडुभ्यः स्वाहा ।
ॐपञ्चेन्द्रियेभ्यः स्वाहा । ॐगायत्र्यै स्वाहा । ॐसावित्र्यै स्वाहा ।
ॐसरस्वत्यै स्वाहा । ॐगृहमात्रे स्वाहा । ॐअन्नपूर्णायै स्वाहा ।
ॐमहालक्ष्म्यै स्वाहा । ॐमहारिष्टविनाशिन्यै स्वाहा ।
ॐचण्ड्यै स्वाहा । ॐद्यौराल्यै स्वाहा । ॐभूमिदेवाय स्वाहा ।
ॐक्षेत्रपालाय स्वाहा । ॐग्रामदेवाय स्वाहा । ॐपातालवासुकिभ्यः स्वाहा ।
ॐमित्रलोकपालाय स्वाहा । ॐब्रतराजाय स्वाहा ।
ॐधात्रादि द्वादशादित्येभ्यः स्वाहा । ॐवीरभद्रादि एकादशरुद्रेभ्यः स्वाहा ।
ॐआवहादि सप्तमरुद्भ्यः स्वाहा । ॐविनायकादि पञ्चलोकपालेभ्यः स्वाहा ।
ॐगौर्यादि शोडशमातृकाभ्यः स्वाहा । ॐइन्द्रादि दशदिक्पालेभ्यः स्वाहा ।
ॐअश्विनीकुमाराभ्यां स्वाहा ॐतिथिभ्यः स्वाहा

ॐबारेभ्यः स्वाहा ॐनक्षत्रेभ्यः स्वाहा ॐकरणेभ्यः स्वाहा ।
ॐभूम्यै स्वाहा ॐमेघेभ्यः स्वाहा । ॐनदीभ्यः स्वाहा ।
ॐसमुद्रेभ्यः स्वाहा । ॐअन्तरिक्षाय स्वाहा । ॐइष्टदेवाय स्वाहा ।
ॐकुलदेवाय स्वाहा । ॐसर्वेभ्यो देवेभ्यः स्वाहा ॐपितृभ्यः स्वाहा
ॐवास्तुदेवाय स्वाहा ॐसर्वेभ्यो देवेभ्यः स्वाहा ।

यजमानका कुल देवतालाई हवन गर्ने

ॐकुलायिनी घृतवती पुरन्धिःस्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाऽध्वर्यू सादयतामिह त्वा स्वाहा ॥

अग्निलाई हवन

ॐऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रङ्घर्ममीमहे ।
उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥स्वाहा ॥
ॐवैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥स्वाहा ॥
ॐवैश्वानरो नऽऊतयऽआप्रयातु परापतः । अग्निरुक्थेन वाहसा । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥स्वाहा ॥

ॐआकाशे यानि तीर्थानि यानि तीर्थानि भूतले ।
पाताले यानि तीर्थानि सर्व तीर्थ नमोऽस्तुते ॥स्वाहा॥
ॐआकाशे सन्ति ये देवा ये देवाः सन्ति भूतले ।
पाताले सन्ति ये देवाः सर्वदेव नमोऽस्तुते ॥ स्वाहा॥
ॐआकाशे यानि लिङ्गानि यानि लिङ्गानि भूतले ।
पाताले यानि लिङ्गानि सर्वलिङ्ग नमोऽस्तु ते ॥स्वाहा॥
ॐअग्नये स्विष्टकृते स्वाहा ॥ ततः संस्रवप्राशनम् ॥
(सुरोको घिउ पातमा लगाई यजमानलाई जिभ्रोमा लगाउन दिने ।)

उत्तराङ्ग हवन

घिउले मात्र हवन गर्ने

ॐभूर्भुवः स्वरिति महाव्याहृतीनां प्रजापति ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुप्छन्दाँसि अग्न्याधाने विनियोगः ।
ॐभूः स्वाहा । इदमग्नये न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)
ॐभुवः स्वाहा । इदं वायवे न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)
ॐस्वः स्वाहा । इदं सूर्याय न मम ॥ (**प्रोक्षणीपात्रेऽपि प्रक्षिपेत्**)

ॐत्वन्नो अग्न इति वामदेवऋषिरग्निवरुणौ देवते स्त्रिष्टुप्छन्दःआज्यहोमे विनियोगः ।
ॐत्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा गुँ सि प्रमुमुग्ध्यस्मत् ॥स्वाहा॥
(इदमग्नीवरुणाभ्यां न मम । **प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ॥**)
ॐस त्वन्नोऽअग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दः अग्निवरुणौ देवते आज्यहोमे विनियोगः ।
ॐस त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ।
अवयक्ष्व नो वरुण गूँ रराणो वीहि मृडीक गूँ सुहवो नऽएधि ॥स्वाहा॥
(इदमग्नीवरुणाभ्यां न मम । **प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ॥**)
ॐअयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः ।
ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि ।
अया नो यज्ञं वहास्यया नो धेहि भेषज गूँ स्वाहा ॥स्वाहा॥
(इदमग्नये न मम । **प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ॥**)
ॐये ते शतमिति वामदेवऋषि स्त्रिष्टुप्छन्दो वरुणः सविताविष्णुर्विश्वेदेवामरुतःस्वर्का देवता प्रायश्चित्तहोमे विनियोगः ।
ॐये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।
ते भिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥
(इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यःस्वर्केभ्यो न मम ॥
प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ॥)
ॐउदुत्तममिति शुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ।
ॐउदुत्तमँवरुण पाशमस्मदवाधमँवि मध्यम गुँ श्रथाय ।
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥स्वाहा॥
(इदं वरुणाय न मम । **प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ॥**)
ॐप्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ।
ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम ॥

स्थापिता देवताको उत्तराङ्ग पूजा

(कर्ताले कर्मपात्रको जल हातमा लिएर संकल्प गर्ने)

ॐअद्येत्यादि पूर्वसंकल्पसिद्धिरस्तु मम कृतस्य.....कर्मणः साङ्गतासिद्धचर्थं स्थापितदेवतानां उत्तराङ्गपूजनं अहं करिष्ये ।

चन्दन,अक्षता,तिल आदिले सबैदेवतालाई पूजा गर्ने ।

ॐअग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव व्वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥

(हवन गर्ने ब्राह्मणले कर्मपात्रको जल लिएर संकल्प गर्ने)

ॐअद्येत्यादि कृतस्य.....कर्मणः परिपूर्णतासिद्धयर्थं पूर्णहुतिं होमयिष्ये ।

घृत धारा

ॐमूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् ।
कवि गुँ सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः ॥स्वाहा॥

सुरोको पूजा

सामग्रीःचन्दन,अक्षता पुष्प

ॐस्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मे
धिषवणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मे
वभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

प्रणीता उठाउने

ब्राह्मणले प्रणीतापात्र उठाएर त्यसको जलले अभिशेचन गर्ने ।

ॐअदिते अनुमन्वस्व । अग्निको दक्षिणदेखि पूर्वसम्म ।
ॐअनुमते अनुमन्वस्व । पश्चिमदेखि उत्तरसम्म ।
ॐसरस्वते अनुमन्वस्व । उत्तरदेखि पूर्वसम्म ।
ॐदेवसवितः प्रसवः। सबैतिर अभिशेचन गर्ने ।

शुद्धजल थपेर मार्जन गर्ने ।

ॐसदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि
पूर्ण मे भूयाः अक्षतमसि मामेक्षेष्टाः ।

पूर्वेः ॐदेवाऋषयो मार्जन्ताम् ।
दक्षिणेः ॐमातापितरो मार्जन्ताम् ।
पश्चिमे:ॐगृहापशवो मार्जन्ताम् ।
उत्तरेः ॐआपओषधयो वनस्पतयो मार्जन्ताम् ।
ऊर्ध्वः ॐयज्ञसंवत्सरो यज्ञपतिमार्जन्ताम् ।
यजमान:ॐसुमित्रियान आप ओषधयः सन्तु ।

(प्रणीतापात्रलाई ईशानकोणमा घोप्ट्याउने)

ॐदुर्मित्रियास्तस्मैसन्तु योस्मान्द्वेष्टि्चञ्चयवन्द्विष्मः ॥

बर्हिहवन

यज्ञमा विछाएका कुशलाई भेला पारेर हवन गर्ने ।
यजमानले कर्मपात्रको जल लिएर संकल्प गर्ने

ॐदेवागातु इत्यस्य मनसस्पति ऋषि विराट्छन्दो वातोदेवता बर्हिहोमे
विनियोगः ॥

ॐदेवागातुविदोगातुं व्वित्वागातुमित । मनसस्पतऽइमन्देवयज्ञ गुँ स्वाहा व्वातेधाः ॥

पूर्णाहुति

(मूलकर्ताले घिउले भिजेकोवस्त्रमा चन्दन,पुष्प,सानोफल,चरु लिएर हवन गर्ने)

ॐएधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ।
समाववर्ति पृथिवी समुषाः समुसूर्यः समुविश्वमिदं जगत् ।
वैश्वानरञ्ज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः ॥स्वाहा ॥

शेष (रहेको) चरु सपरिवारले तीन पटक हवन गर्ने ।

ॐअब्भ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतञ्च श्रद्धाञ्चोपैमीन्धे त्वा दीक्षितोऽअहम् ॥स्वाहा॥
ॐयत्र ब्रह्म च क्षत्रञ्च सम्यञ्चौ चरतः सह ।
तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥स्वाहा॥
ॐयत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह ।
तँल्लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥स्वाहा ॥

पूर्णपात्र

(सामाग्रीःपित्तलको भाँडो वा बटुको अथवा कुनै पात्रमा यथासम्भव भरी ।)

चामल,फल,फूल,पैसा,चन्दन,सुपारी,यज्ञोपवीत आदि राखेर पूजा गर्ने ।)

ॐपूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्ज गूँ शतक्रतो ॥

(कर्मपात्रको जल लिएर संकल्प गरेर ब्राह्मणलाई दिने)

ॐअद्येहेत्यादि अस्मिन् .....कर्माङ्गभूतहोम कर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्मप्रतिष्ठार्थं इदं पूर्णपात्रं प्रजापतिदैवतं .....गोत्राय .....शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

(ब्राह्मणले कर्मपात्रको जलले यजमानलाई अशिषेक दिने)

ॐद्यौः शान्तिरन्तरिक्ष गूँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व गूँ शान्तिः शान्तिरेव शान्तिःसा मा शान्तिरेधि ॥

आरती

(सामाग्रीःआरतीपात्र वात्तिसहित,लाइटर,शुद्धजल पात्रमा,चामर,
अर्घ्य(पानी,दूध,कुशका टुक्रा,दही,घिउ,तिल,अक्षता,दूवो।)

आपः क्षीरं कुशाग्राणि दध्याज्यतिलतण्डुलान् । दूर्वा सिद्धार्थकं ग्राह्यमष्टाङ्गोऽह्यर्घ्य उच्यते ॥

ॐसप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥

ॐसुवर्ति कर्पूर विदीपितेन सामान्य पात्रे विनियोजितेन ।
निराजयेत्वामहमप्रमेय दिव्येन दीपेन दिवप्रदेन ॥

(धेनुमुद्रा,जलघुमाउने,बत्ती)

आरती

ॐजय जगदीश हरे, प्रभु जय जगदीश हरे ।
प्रभुका चरण उपासक, कति कति पार तरे ॥
मनको थाल मनोहर प्रेमरूप बाती प्रभु...
भाव कपूर छ मङ्गल आरती सब भाँती ॥ ॐ जय..
नित्य निरञ्जन निर्मल कारण अविनाशी प्रभु...
शरणागत प्रतिपालक चिन्मय सुखराशी ॥ ॐ जय..
सृष्टि स्थिति लयकर्ता त्रिभुवनका स्वामी प्रभु...
भक्ति सुधा वर्षाऊ शरण पर्‍यौं हामी ॥ ॐ जय..
आसुर भाव निवारक, तारक सुखदाता प्रभु...
गुण अनुरूप तिमी हौ, हरिहर हौ धाता ॥ ॐ जय..
युग युग पालन गर्छौ, अगणित रूपधरी प्रभु...
लीलामय रस विग्रह, करूणा मूर्ति हरि ॥ ॐ जय..
समता शान्ति प्रदायक, सज्जन हितकारी प्रभु...
चरणशरण अब पाऊँ, प्रभु भव भयहारी ॥ ॐ जय ..
भाव मनोहर देऊ, साधक फलदायी प्रभु...
जीवन धन्य बनोस् प्रभु, पदसेवा पाई ॥ ॐ जय..
संयम सुर सरिताको, अविरल धार बहोस् प्रभु...
जति जति जन्म भए पनि प्रभुमा प्रेम रहोस् ॥ ॐ जय ..
प्रेम सहित शुभ आरती, जसले नित्य गर्‍यो प्रभु...
दिन दिन निर्मल बन्दै, त्यो भवसिन्धु तर्‍यो ॥ ॐ जय ..

चामर/पंख डोलाउने

ॐजयतु जयतु देवो देवकीनन्दनोयम्
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।
जयतु जयतु मेघश्यामलः कोमलांगो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः॥

अर्घ्य समर्पण गर्ने

जातोदैत्यवधर्थाय देवानां पालनाय च ।
तस्मै देवाय सत्याय सगुणाय नमो नमः ॥

व्यक्ताव्यक्त स्वरूपाय हृषिकपतये नमः ।
गृहाणार्घं मया दत्तं राधय सहित प्रभो ॥

शंख जल घुमाउने

ॐशंखमध्येस्थितं तोयं भ्रामितं केशवोपरि ।
अंगलग्नं मनुष्याणां सर्वपापं व्यपोहति ॥

पुष्पाञ्जली

ॐवेदान्तार्थनिवेद्यचिन्मयपरब्रह्मस्वरूपान्वितौ
दिव्यौ नित्यकिशोररूपरुचिरौ गोलोकधामेश्वरौ ।
भक्तानां प्रणयप्रकर्षमभितः संवर्धयन्तौ सदा
श्रीराधामुरलीधरौ मम हृदि क्षेमङ्करौ स्तां चिरम् ॥

श्रीहंसं सनकादिकान् सुरऋषिं निम्बार्क देवं गुरुम्
श्रीमद्द्वादश सद्गुरुन् श्रुतिपरान् श्रीश्रीनिवासादिकान् ।
वन्दे सुन्दरभट्टदेशिकमुखान् वस्विन्दुसंख्यायुतान्
सर्वाचार्यवरान् गजद्गुरुहरि व्यासात् परान् सादरम् ॥

हे निम्बार्क ! दयानिधे ! गुणनिधे ! हे भक्तचिन्तामणे !
हे आचार्य शिरोमणे ! मुनिगणैरामृग्यपादाम्बुज !
हे सृष्टिस्थितिपालक ! श्रुतिनिधे ! हे नाथ मायाधिप ।
हे गोवर्धनकन्दरालय ! विभो ! मां पाहि सर्वेश्वर ! ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥

अहो ! दयालो स्वदया वशेन वै प्रपश्य मां प्रापय पादसेवने ।
यथा पुनर्मे विषयेषु माधव रतिर्न भूयाद्धि तथैव साधय ॥

वशीकृतिं यान्ति नहीन्द्रियाणि बुद्धिर्न शुद्धिं समुपैति तस्मात् ।
न साधनं मेऽस्ति तव प्रसादे दयालुभावेन विना हरे ते ॥

अहो ! बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितांततोन्यं कं वा दयालुं शरणं व्रजेम ॥

वृन्दावनकलानाथौ हृदयानन्दवर्धनौ ।
सुखदौ राधिकाकृष्णौ भजेहं कुञ्जगामिनौ ॥

राधां कृष्णस्वरूपां वै कृष्णंराधास्वरूपिणम् ।
कलात्मानं निकुञ्जस्थं गुरुरूपं सदा भजे ॥

देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु श्रीराधाकृष्णपादब्जरेणवः ॥

जन्मप्रभृति दासोस्मि शिष्योस्मि तनयोस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ! ॥

ॐ श्रीहरिचरणकमलवृन्देभ्यो नमः

अथ गुरुपरम्परा

श्रीमद्हंस समारम्भां निम्बभास्कर मध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरु परम्पराम् ॥
हंसस्वरूपं रुचिरं विधाय यः सम्प्रदायस्य प्रवर्तनार्थम् ।
स्वतत्वमाख्यात् सनकादिकेभ्यो नारायणं तं शरणं प्रपद्ये ॥१॥

यदीय पादाब्जयुगाश्रयेण भक्तिवरिष्ठात्ववती विशुद्धा ।
उदञ्चति श्रीभगवत्यजस्रं नमाम्यहं श्रीसनकादिकं तम् ॥२॥

सुधाकरे स्वेच्छतनुत्वभावं स्वर्णोपवीतीत्वमुपैति वासम् ।
प्रवर्तयन्तं हरिभक्तियोगं श्रीनारदं तं शरणं व्रजामि ॥३॥

यत्संप्रदायाश्रयणान्नराणां श्रीराधिका कृष्ण पदारविन्दे ।
प्रेमागरीयान्सहसाभ्युदैति निम्बार्कमेतं शरणं प्रपद्ये ॥४॥

शंखावतारःपुरुषोत्तमस्य यस्यध्वनि शास्त्रमचिन्त्यशक्तिः ।
यत्स्पर्शमात्राद् ध्रुवमाप्तकामस्तं श्रीनिवासं शरणं प्रपद्ये ॥५॥

देवाचार्यहरिव्यासचरणाम्बुजषट्पदम् ।
आचार्यं श्रीस्वभूरामं द्वारमुख्यं नमाम्यहम् ॥६॥

श्रीवत्सवंशजलधेः परिपूर्णचन्द्रम् शान्तस्वरूपममलं भगवत्प्रपन्नम् ।
वृन्दावनस्थसनकादिमठावतंसं श्रीमद्ध्रुवाख्य यतिराजमहं नमामि ॥७॥

वत्सान्वयामलपयोनिधिपूर्णचन्द्रम् श्रीमद्ध्रुवाख्ययतिराजपदाब्जभृङ्गम् ।
सत्संस्थया कृतसनातनधर्मरक्षं श्रीकेशवं गुरुमहं शरणं प्रपद्ये ॥ ८॥

भारद्वाजकुलोद्भवं श्रुतिपरं सद्भक्तिसंबर्धकम्
संतसद्गुरुकेशवस्य चरणसरोजभृङ्गंप्रियम् ।
वैदिकस्यसनातनस्य नियमान् सर्वान्सदारक्षकम्
सौम्यं भक्तजनाश्रयं गुरुमहं श्रीवासुदेवं भजे॥९॥

श्रीमद्वशिष्ठकुलभूषण सच्चरित्रम् जगत्गुरुं सकलज्ञानयुतं महान्तम् ।
निम्बार्कधर्मपरिवर्धन ज्योतिरूपम् श्रीमोहनं श्रुतिपरं शरणं प्रपद्ये ॥१०॥

आनन्द मानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नतोस्मि ॥

श्रीगुरुचरणकमलेभ्यो नमः

सनकादींस्तथा लक्ष्मीं ब्रह्माणं रुद्रमेव च ।
वन्देहं वैष्णवाचार्यान् संप्रदाय प्रवर्तकान् ॥

प्रह्लादनारदपराशरपुण्डरीक व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
रुक्मांगदार्जुनवशिष्ठविभीषणादीन् पुण्यानिमान् परमभागतान्नमामि ॥
वाञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च ।
पतितानां पावनेभ्यो वैष्णवेभ्यो नमो नमः ॥

समस्त वैष्णवेभ्यो नमो नमः

इमानि पुष्पाणि मनोहराणि सुरासुराणामपिदुर्लभानि ।
कल्पद्रुमादिद्रुमजानितानि पुष्पाञ्जलिर्मेऽस्तुसुखाय नित्यं ॥
ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

पुष्पाञ्जलिं समर्पयामि

अर्चना

(तुलसीदल र तिलले अर्चना गर्ने।)

१।ॐकेशवाय नमः २।ॐनारायणाय नमः
३।ॐमाधवाय नमः ४।ॐगोविन्दाय नमः
५।ॐविष्णवे नमः ६।ॐमधुसूदनाय नमः
७।ॐत्रिविक्रमाय नमः ८।ॐवामनाय नमः
९।ॐश्रीधराय नमः १०।ॐहृषिकेशाय नमः
११।ॐपद्मनाभाय नमः १२।ॐदामोदराय नमः
१३।ॐवासुदेवाय नमः १४।ॐसंकर्षणाय नमः
१५।ॐप्रद्युम्नाय नमः १६।ॐअनिरुद्धाय नमः
१७।ॐअधोक्षजाय नमः १८।ॐपुरुषोत्तमाय नमः
१९।ॐनृसिंहाय नमः २०।ॐअच्युताय नमः
२१।ॐजनार्दनाय नमः २२।ॐउपेन्द्राय नमः
२३।ॐहरये नमः २४।ॐश्रीकृष्णाय नमः

१।ॐश्रीराधायै नमः २।ॐश्रीराधिकायै नमः ३।ॐश्रीसर्वेश्वर्यै नमः
४।ॐश्रीयुथेश्वर्यै नमः ५।ॐश्रीब्रजेश्वर्यै नमः ६।ॐश्रीरासेश्वर्यै नमः
७।ॐश्रीपरायै नमः ८।ॐश्रीहरिवल्लभायै नमः ९।ॐश्रीत्रिलोकसुन्दर्यै नमः
१०।ॐश्रीनित्यायै नमः ११।ॐश्रीकिशोर्यै नमः १२।ॐश्रीभक्तवत्सलायै नमः

.....

१।ॐश्रीरूक्मिण्यै नमः २।ॐश्रीजाम्बवत्यै नमः ३।ॐश्रीसत्यभामायै नमः
४।ॐश्रीकालिन्द्यै नमः ५।ॐश्रीमित्रविन्दायै नमः ६।ॐश्रीनाग्नजित्यै नमः
७।ॐश्रीभद्रायै नमः ८।ॐश्रीलक्ष्मणायै नमः

.....

ॐश्रीअस्मद् गुरुभ्यो नमः ॐश्रीअस्मत् परमगुरुभ्यो नमः
ॐश्रीअस्मत्सर्वगुरुभ्यो नमः ॐश्रीमते हंसनारायणाय नमः
ॐश्रीसनमादि ऋषिभ्यो नमः ॐश्रीदेवर्षये नारदाय नमः
ॐश्रीनिम्बार्कमहामुनीन्द्राय नमः ॐश्रीसर्वेभ्यो आचार्यवर्येभ्यो नमः
ॐश्रीमते सर्वेश्वराय नमः।

जय जयकार लगाउने

दण्डवत्

अपराध सहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवल मात्मसात्कुरु ॥
जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ! ॥

क्षेत्रपाललाई उपहार

(सामाग्रीःचारवटा दुनामा ससाना फल,लाजा,नैवेद्य,जल,बत्ति)

(यजमानले कर्मपात्रको जल लिएर संकल्प गरी यज्ञकुण्डको चारैदिशामा राख्ने)

(पहिलो दुनाको वत्ति बालेर यजमानले कर्मपात्रको जल लिएर संकल्प गर्ने)

पूर्वः ॐआद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशिस्थिता ।
प्रसन्नाः परितुष्टासौ गृह्णन्तु बलिमुत्तमम् ॥

(दोस्रो दुनाको वत्ति बालेर यजमानले कर्मपात्रको जल लिएर संकल्प गर्ने)

दक्षिणः ॐवृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।
भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु ते त्वमुम् ॥

(तेस्रो दुनाको वत्ति बालेर यजमानले कर्मपात्रको जल लिएर संकल्प गर्ने)

पश्चिमःॐविनायकाः क्षेत्रपाला ये चान्ये बलिकांक्षिणः ।
पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु ते बलिम् ॥

(चौथो दुनाको वत्ति बालेर यजमानले कर्मपात्रको जल लिएर संकल्प गर्ने)

उत्तरः ॐकुमुदाद्याश्च ये भूताः सर्वतो दिक्षु संस्थिताः ।
आगच्छन्तु च ते सर्वे गृह्णन्तु बलिमुत्तमम् ॥

यज्ञाङ्ग गोदानविधिः

(गाईमा सम्पूर्ण देवताको वास हुन्छ । गाई लक्ष्मी हुन् । गाईलाई धन पनि मानिन्छ । गाईको अभावमा द्रव्य–धन लक्ष्मीको पूजा हुन्छ ।)

(सामाग्रीः रित्ता ३ वटा दुना,गाई वा दुनामा रुपैयाँ, पैसा, सानो दुनामा पानी,चन्दन,अक्षता,पुष्प,कर्मपात्र,कुशका टुका)

(कर्मपात्रको जलले गाईलाई आवाहन गर्ने ।)

ॐआवाहयाम्यहं देवीं गां त्वां त्रैलोक्यमातरम् ।
यस्याः स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥

(चन्दन,अक्षता,पुष्पले गाईको पूजा गर्ने ।)

ॐनमो गोभ्यः श्रीमतीभ्यःसौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

ॐइरावती धेनुमती हि भूत गूँ सूयवसिनी मनवे दशस्या ।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥

गाईको प्रार्थना

पृष्ठे ब्रह्मा गले विष्णुर्मुखे रुद्राः प्रतिष्ठिताः ।
मध्ये देवगणाः सर्वे रोमकूपे महर्षयः ॥
नागाः पुच्छे खुराग्रेषु ये चाष्टौ कुलपर्वताः ।
मूत्रे गङ्गादयो नद्यो नेत्रयोः शशिभास्करौ ॥
श्रृङ्गयोः सर्वतीर्थानि गोमये कमलालया ।
स्तनेषु सागराः सर्वे जिह्वायां च सरस्वती ॥
कर्णयोरस्विनौ नासापुटयोः सुमुखः स्मृतः ।
दक्षपार्श्वे कुवेरस्तु वामे जलधिनायकः ॥
हुङ्कारे सर्वदेवाश्च धरा चैवोदरे स्थिता ।
एते यस्याः स्तनौ देवाः सा धेनुर्वरदास्तु मे ॥
या लक्ष्मीः सर्वभूतानां यत्र देवा व्यवस्थिताः ।
धेनुरूपेण सा देवी मम पापं व्यापोहतु ॥

(गाईदान लिने ब्राह्मणकलाई वरण गर्ने)

ॐब्राह्मणाय नमः

ॐनमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ॐआ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

(दूनाको जल वा गाईको पुच्छरले सिंचन गर्ने ।)

ॐमनो मे तर्पयत, वाचं मे तर्पयत, प्राणं मे तर्पयत, चक्षुर्म्मे तर्पयत, श्रोतं मे तर्पयतात्मानं मे तर्पयत, प्रजां मे तर्पयत पशून्मे तर्पयत, गणान्मे तर्पयत गणा मे मा व्वितृषन् ॥

(एउटा दुनोमा कर्मपात्रको जलले मार्जन गर्ने ।)

ॐआपो हिष्ठामयोभुव ॥ ॐस्तानऽउर्जे दधातन ॥ ॐमहेरणाय चक्षसे ॥
ॐयो व : शिवतमो रसः ॥ ॐस्तस्य भाजयतेह नः ॥ ॐउशतीरिव मातरः॥
ॐतस्माऽअरं गमाम वो यस्यक्षयाय जिन्वथ॥ ॐआपो जनयथा च नः ॥

संकल्प

हरिॐतत्सत्,ॐविष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत् सृष्टिकारिणो ब्रह्मणो द्वितीये परार्द्धे श्रीश्वेतवाराहकल्पे सप्तमे वैश्वस्वतमन्वन्तरे बौद्धावतारे अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके

भूमण्डलस्य पश्मिोत्तर भागे पूर्वतः एट्लान्टिक महासागरःपश्चिमतःपसिफिक महासागरःपरिवेष्टिते,मिसिसिपी,मिसौरीआदि महानदिभिः सिंचिते उत्तरतः हिमशिखरयुक्त पवर्तमालाभिःपरिशोभिते विकसित नगराःग्रामादि सहित पञ्चाशतप्रान्तयुते अमेरिका महादेशान्तर्गत.....राज्ये । ..... .नगरेस्थिते.....ग्रामेस्थिते अस्मिन् गृहे श्रीअर्चाविग्रह शालाग्राम समीपे इह शुद्ध भूमौ ॥ षष्ठि संवत्सराणां मध्ये.....संवत्सरे श्रीसूर्य.....अयने..... ऋतौ.....मासे.....पक्षे.....तिथौ.....वासरे , सूर्यचन्द्रादि नवग्रहाः यथायथा राशिस्थितेषुषत्सु समस्त ग्रहगणविशेषेण विशिष्टान्वितायां शुभपुण्य तिथौ ॥ .....गोत्रस्य.....प्रवरस्य अच्युतगोत्रसमासक्त.....शरणोऽहं मम पत्नी, पुत्रपौत्रादि समस्तकुटुम्ब सहितस्य अस्माकं गृहे कृतस्य हवनकर्मणः परिपूर्णार्थं इमां गां तदभावे द्रव्यं/लोष्टं सरस्वती दैवतं .....गोत्राय.....शर्मणे ब्राह्मणाय इदं यज्ञाङ्ग संज्ञक गोदानत्वेन तुभ्यं अहं सम्प्रददे ।

(कर्मपात्रको जल,द्रव्य,कुश हातमा लिएर संकल्प गरी ब्राह्मणलाई समर्पण गर्ने)

(हातमा पुष्प लिएर गाईको प्रार्थना गर्ने ।)

ॐकपिले सर्वदेवानां पूजनीयासि रोहिणी ।
तीर्थदेवमयी यस्मात् तस्मात् शान्तिं प्रयच्छ मे ॥
ॐगावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

दान प्रतिष्ठा

(प्रतिष्ठाका निम्ति दुनामा कुशका टुका राखी त्यस माथि पैसा राखेर पूजा गर्ने ।)

ॐस्वर्ण धर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा
स्वर्ण ज्योतिः स्वाहा स्वर्ण सूर्यः स्वाहा ॥

संकल्प

ॐअद्यकृतैतत् गोप्रत्याम्नायी भूत द्रव्यदानप्रतिष्ठार्थं द्रव्यं चन्द्रदैवतम् .....शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥

(गाइ लिएपछि ब्राह्मणले निम्न मन्त्र पढ्ने।)

ॐ स्वस्ति

ॐकोदात्कस्माऽअदात्कामोदात्कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥

(ब्राह्मणले अभिशेक गरिदिने)

ॐद्यौः शान्तिरन्तरिक्ष गूँ शान्तिःपृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व गूँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

प्रदक्षिण

गाई र ब्राह्मणको वरिपरि परिक्रमा गर्ने।)

ॐयानि कानि च पापानि जन्मान्तर कृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणः पदेपदे ॥

(पुष्प लिएर नमस्कार गर्ने ।)

ॐनमस्ते कपिले देवि संसारार्णवतारिणि ।
द्विजेन्द्राय ददामि त्वां प्रसन्नो भव सर्वदा ॥

ईति गोदान विधिः

भूयसीदक्षिणा

दक्षिणा पूजा

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥२२॥

कर्म पात्रको जल लिएर दक्षिणामा संकल्प गर्ने

संकल्प

हरिॐतत्सत्,ॐविष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत् सृष्टिकारिणो ब्रह्मणो द्वितीये परार्द्धे श्रीश्वेतवाराहकल्पे सप्तमे वैश्वस्वतमन्वन्तरे बौद्धावतारे अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके भूमण्डलस्य पश्मोत्तर भागे पूर्वतः एट्लान्टिक महासागरःपश्चिमतःपसिफिक महासागरःपरिवेष्टिते,मिसिसिपी,मिसौरीआदि महानदिभिः परिसिंचिते उत्तरतः हिमशिखरयुक्त पर्वतमालाभिःपरिशोभिते विकसित नगरग्रामादि सहित पञ्चाशतप्रान्तयुते अमेरिका महादेशान्तर्गत.....राज्ये । ..... .नगरेस्थिते.....ग्रामेस्थिते अस्मिन् गृहे श्रीअर्चाविग्रह शालाग्राम समीपे इह शुद्ध भूमौ ॥ षष्ठि संवत्सराणां मध्ये.....संवत्सरे श्रीसूर्य.....अयने..... ऋतौ.....मासे.....पक्षे.....तिथौ.....वासरे , सूर्यचन्द्रादि नवग्रहाः यथायथा राशिस्थितेषुषत्सु समस्त ग्रहगणविशेषेण विशिष्टान्वितायां शुभपुण्य तिथौ ॥ .....गोत्रस्य.....प्रवरस्य अच्युतगोत्रसमासक्त.....शरणोऽहं मम पत्नी, पुत्रपौत्रादि समस्तकुटुम्ब सहितस्य संयुक्त रूपेण आयोजितोऽयं .....कर्म सांगत सिद्धये नानानाम गोत्रेभ्यो नानानाम शर्मभ्य ब्राह्मणेभ्यो यथा भागं विभज्य यज्ञान्त भूयसी दक्षिणां वयं करिष्यामहे ।

देव विसर्जन

(यजमानले हातमा चन्दन अक्षता पुष्प लिएर स्थापितदेवतालाई पूजन गरी कूर्चस्वरुप ब्रह्मादि देवतालाई विर्सजन गर्ने ।)

ॐउत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्राशुर्भवा सचा ॥
ॐयान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥
ॐगच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥
ॐआवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥

(कर्ताले हातमा लगाएको औंठी वा सूत्र निकालेर कर्मपात्रको जल लिएर संकल्प गर्ने)

ॐकायेन वाचा मनसेन्द्रियैर्वा बुद्धयत्मनावानुसृत स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥

नमस्कार गर्ने

ॐचतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥
ॐयस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐअच्युताय नमः ३ एतत्कर्म श्रीकृष्णार्पणमस्तु

अभिषेक

(मूलकलशको जलले सम्पूर्ण भक्तजनलाई अभिषेक गरिदिने)

स्वस्तिवाचन

ॐआ नो भद्राः क्रतवो यन्तु विश्वतोदब्धासोऽअपरीतासऽउद्भिदः।
देवा नो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवेदिवे ॥
देवानाम्भद्रा सुमतिर्ऋजूयतान्देवाना गुँ रातिरभि नो निवर्तताम् ।
देवाना गुँ सख्यमुपसेदिमा वयन्देवा नऽआयुः प्रतिरन्तु जीवसे ॥
तान्पूर्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्षमस्त्रिधम् ।
अर्यमणँवरुण गूँ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥
तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना श्रुणुतन्धिष्ण्या युवम् ॥
तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।

पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥
स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
पृषदश्वा मरुतः पृश्निमातरः शुभँयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽअवसागमन्निह ॥
भद्रङ्कर्णेभिः श्रृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा गुँ सस्तनूभिर्व्यशेमहि देवहितँयदायुः ॥
शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवाऽ अदितिः पञ्च जनाऽअदितिर्जातमदितिर्जनित्वम् ॥
द्यौःशान्तिरन्तरिक्ष गूँ शान्तिः पृथिवीशान्तिरापःशान्तिरोषधयः शान्तिः।
व्वनस्प्पतयःशान्तिर्व्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिः सर्व्व
गूँ शान्तिःशान्तिरेवशान्तिः सामाशान्तिरेधि ॥
यतोयतःसमीहसेततोनोऽअभयङ्कुरु ।
शन्नःकुरुप्प्रजाब्भ्योभयन्नःपशुब्भ्यः॥

इति स्वस्तिवाचनम्

आशिर्वाद

यजमानलाई तिलक सहित आशिर्वाद दिने

ॐश्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

.....

परिशिष्ट

अष्टचिरञ्जीवि पूजाविधि



ॐव्यासाय नमः

ॐनारायणांश सम्भूत ज्ञानाधार तपोनिधे ।
श्रीव्यास शास्त्रकर्तार कुरु मां चीरजीविनम् ॥१॥

ॐपरशुरामाय नमः

ॐजामदग्य महावीर कार्तवीर्यार्जुनान्तक ।
प्रयच्छ आयुरारोग्यं रेणुका सुत ते नमः ॥२॥

ॐअश्वत्थाम्ने नमः

ॐद्रोणपुत्र महाभाग रुद्रतेज समुद्भव ।
भवायुर्वरदो मे त्वं अश्वत्थाम्ने नमो नमः ॥३॥

ॐकृपाचार्यय नमः

ॐकृपाचार्य राजगुरो सर्वशास्त्र विशारद ।
शरणं त्वां प्रपद्येहं कृपया रक्ष सर्वदा ॥४॥

ॐबलये नमः

ॐदैत्येन्द्रकूलसम्भूत दान यज्ञक्रियारतः ।
आगतः शरणं तेऽहं दीर्घमायुः प्रयच्छ मे ॥५॥

ॐविभीषणाय नमः

ॐविभीषण नमस्तुभ्यं रामपादब्जसेवक ।
आयुरारोग्यमैश्वर्यं देहि पौलस्त्यनन्दन ॥६॥

ॐहनुमते नमः

ॐअञ्जनीगर्भसम्भूत कपीन्द्र बलवत्तर ।
रामप्रिय नमस्तुभ्यं हनुमान् पाहि मां सदा ॥७॥

ॐमार्कण्डेयाय नमः

ॐमार्कण्डेय नमस्तुभ्यं सप्तकल्पान्त जीवन ।
आयुरारोग्य सिद्धार्थं प्रसीद भगवान् मुने ॥८॥

दश दिक्पाल पूजा

१।पूर्वमा ईन्द्र

ॐत्रातारमिन्द्रमवितारमिन्द गूँ हवेहवे सुहव गूँ शूरमिन्द्रम् ।
ह्वयामि शक्रम्पुरुहूतमिन्द्र गुँ स्वस्ति नो मघवा धात्विन्द्रः ॥

२।आग्नये अग्नि

ॐअग्निन्दूतम्पुरो दधे हव्यवाहमुपब्रुवे । देवाँ॥ आसादयादिह ॥

३।दक्षिणे यम

ॐयमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता
मध्वानक्तु पृथिव्याः स गुँ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥

४।नैऋत्यै निऋति

ॐअसुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥

५।पश्चिम वरुण

ॐवरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि
वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ।

६।वायव्ये वायु

ॐवायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥

७।उत्तर कुवेर

ॐसोमो धेनु गूँ सोमोऽअर्वन्तमाशु गूँ सोमो वीरङ्कर्मण्यन्ददाति ।
सादन्यँविदथ्यगूँ सभेयम्पितृश्रवणँयो ददाशदस्मै ॥

८।ईशान ईशान

ॐतमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

९।पूर्वईशान मध्ये ब्रह्मा

ॐब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

१०।नैऋत्यपश्चिम मध्ये अनन्त

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि गूँ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥

१।श्रीषुरुषसूक्तम्

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि गूँ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेद गूँ सर्वंयद्भूतँयच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥
ततो विराडजायत विराजोऽअधि पूरुषः ।
स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥
तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दा गुँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥
तस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माञ्जाताऽअजावयः ॥८॥
तँयज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥९॥
यत्पुरुषँव्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादाऽउच्येते ॥१०॥
ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या गुँ शूद्रोऽअजायत ॥११॥
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥
नाभ्याऽआसीदन्तरिक्ष गूँ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथा लोकाऽँऽअकल्पयन् ॥१३॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥१५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥
अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१७॥
वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय ॥१८॥
प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते ।
तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥१९॥
यो देवेभ्यऽआतपति यो देवानाम्पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥
रुचम्ब्राह्मञ्जनयन्तो देवाऽअग्रे तदब्रुवन् ।
यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ॥२१॥
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥२२॥

२। अथ श्रीसूक्तम्

अरुणकमलसंस्था तद्रजः पुञ्जवर्णा
करकमलधृतेष्टा भीतियुग्माम्बुजा च ।
मणिकटकविचित्रालंकृताकल्पजालैः
सकलभुवनमाता सन्ततं श्रीं नमामि ॥
ॐहिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोमआवह ॥१॥
ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मादेवीजूषताम् ॥३॥
कांसोस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥

चन्द्रांप्रभासां यशसाज्वलन्तीं श्रियं लोकेदेवजुष्टामुदाराम् ।
तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्मेनश्यतां त्वां वृणे ॥५॥
आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ विल्वः ।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च वाह्याअलक्ष्मीः॥६॥
उपैतु मां देवसखः कीर्तिश्च मणिनासह ।
प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥७॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥
कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियंवासय मे कूले मातरं पद्ममालिनीम् ॥११॥
आपः सृजन्तु स्निग्धानि चिक्लीतवस मे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥
ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयं पुरुषानहम् ॥१५॥
यः शुचिः प्रयतोभूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६॥
पद्मानने पद्मऊरू पद्माक्षि पद्मसंभवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥१७॥
अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥१८॥
पुत्र पौत्र धनं धान्यं हस्त्यस्वादि गवेरथम् ।
प्रजानां भवसि मातः आयुष्मन्तं करोतु माम् ॥१९॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो वृहस्पतिर्वरुणं धनमस्तु मे ॥२०॥

वैनतेय सोमं पिव सोमं पिवतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥२१॥
नक्रोधो न च मात्सर्यं नलोभो नाशुभामतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२२॥
सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिबल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥२३॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥२४॥
ॐमहालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि तन्नो लक्ष्मी प्रचोदयात् ॥२५॥
पद्मानने पद्मिनी पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं हृदि संनिधत्स्व ॥२६॥
आनन्दकर्दम श्रीदश्चिक्लीत इव विश्रुताः ।
ऋषयः श्रियपुत्राश्च श्रीर्देवी देवता श्रिया ॥२७॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥२८॥
ऋणरोगादि दारिद्र्यं पापक्षुदपमृत्यवः।
भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥२९॥

३। विष्णुसूक्तम्

ॐविष्णोर्नूकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजा गुँ सि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥१॥
विष्णोरराटमसि विष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसि
विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवेत्वा ॥२॥
तदस्य प्रियमभि पाथो अस्यां नरो यत्र देवयवो मदन्ति ।
ऊरुक्रमस्य सहिबन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥३॥
प्रतद्विष्णुस्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥४॥
परो मात्रया तनुवावृधान नते महित्वमन्वश्नुवन्ति ।
उभे ते विद्य रजसी पृथिव्या विष्णोर्देवत्वं परमस्य वित्से ॥५॥
विचक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषेदशस्यन् ।
ध्रुवासो अस्य कीरयो जनासः उरुक्षिति गुँ सुजनिमा चकार ॥६॥
त्रिदेवः पृथिवीमेष एतां विचक्रमे शतवर्चसं महित्वा ।

प्रविष्णु रस्तु तवसस्तवीयान्त्वेष गुँ ह्यस्य स्थविरस्य नाम ॥७॥
अतोदेवा अवन्तु नोयतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः ॥८॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा गुँ सुरे स्वाहा ॥९॥
त्रिणिपदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥१०॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पसे । इन्द्रस्य युज्यः सखा ॥११॥
तद्विष्णोः परमपदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥१२॥
तद्विप्रासो विपन्यवो जागृवा गुँ सः समिन्धते । विष्णोर्यत्परमं पदम् ॥१३॥

इति श्रीविष्णुसूक्तम्

४। अथ नारायण अनुवाक्

सहस्रशीर्षं देवं विश्वाक्षं विश्वसंभुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥१॥
विश्वतःपरमं नित्यं विश्वं नारायणं हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥२॥
पतिं विश्वस्यात्मेश्वर गुँ शाश्वतं शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥३॥
नारायणपरोज्योति रात्मा नारायणः परः ।
नारायणपरं ब्रह्म तत्वं नारायणः परः ॥४॥
नारायणपरो ध्याता ध्यानं नारायण परः ।
यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ॥५॥
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
अनन्तमव्ययं कवि गुँ समुद्रेऽन्तं विश्वशम्भुवम् ।६॥
पद्मकोषप्रतीकाशं हृदयं चाप्यधोमुखम् ॥
अधो निष्ट्यावितस्त्यान्ते नाभ्यामुपरि तिष्ठति ॥७॥
ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ।
सन्तत गुँ शिराभिस्तु लम्बत्याकोशसन्निभम् ॥८॥
तस्यान्ते सुषिर गुँ सूक्ष्मं तस्मिन्सर्व प्रतिष्ठितम् ।
तस्यमध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ॥९॥
सोऽग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधः शायी रश्मयस्तस्य सन्ततः ॥१०॥
सन्तापयति स्वं देहमापादतलमस्तकम् ॥
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता ॥११॥
नीलतोयदमध्यस्थाद् विद्युल्लेखेव भास्वरा ।

नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा ॥१२॥
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
सब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमस्वराट् ॥१३॥
ऋतं सत्यं परंब्रह्म पुरुष गुँ कृष्णपिंगलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥१४॥
ॐनारायणाय विद्यहे वासुदेवाय धीमहि
तन्नोविष्णुः प्रचोदयात् ॥१४॥

इति नारायणानुवाक्

५।अथ भूसूक्तम्

ॐभूमिर्भूम्ना द्यौर्वरिम्णाऽन्तरिक्षं महित्वा ।
उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥१॥
आऽयङ्गौःपृश्निरक्रमीदसदन्मातरं पुरः ।
पितरञ्च प्रयन्त्सुवः ॥२॥
त्रिंशद्धामविराजति वाक्पतङ्गाय शिश्रिये ।
प्रत्यस्य वहद्युभिः ॥३॥
अस्य प्राणादपानत्यन्तश्चरति रोचना ।
व्यख्यन्महिषःसुवः ॥४॥
यत्वा क्रुद्धः परोवपमन्युना यदवर्त्या
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥५॥
यत्ते मन्युपरोप्तस्य पृथिवीमनुद्दध्वसे ।
आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥६॥
मेदिनीदेवी वसुन्धारा स्याद्वसुधादेवी वासवी ।
ब्रह्मवर्चसः पितृणां श्रोतं चक्षुर्मनः ॥७॥
देवी हिरण्यगर्भिणी देवी प्रसूवरी सदने सत्यायने सीद ॥८॥
समुद्रवती सावित्री ह नो देवी मद्यवी मही ।
धरणीमहोव्यधिष्ठा श्रृङ्गे श्रृङ्गे यज्ञे यज्ञे विभीषिणी ॥९॥
इन्द्रपत्नी व्याजनी सुरसित इह वायुमती जलशयनी ।
श्रियंधाराजा सत्यन्तोपरि मेदिनी श्वोपरिधत्तङ्गाय ॥१०॥
विष्णुपत्नीं महीं देवीं माधवीं माधव प्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम् ॥११॥
ॐधनुर्धरायै विद्महे सर्वसिध्यै च धीमही तन्नो धरा प्रचोदयात् ॥

इति भूसूक्तम्

सर्वतोभद्रचक्र

का
रा
से

		ह	रा	रा	रा	रा	रा			रा	रा	रा	रा	रा	ह		
	का	ह	ह	रा	रा	रा					रा	रा	रा	ह	ह	का	
ह	ह	का	ह	ह	रा							रा	ह	ह	का	ह	ह
रा	ह	ह	का	ह	ह							ह	ह	का	ह	ह	रा
रा	रा	ह	ह	का	ह	ह					ह	ह	का	ह	ह	रा	रा
रा	रा	रा	ह	ह	का	ह	ह			ह	ह	का	ह	ह	रा	रा	रा
रा	रा			ह	ह	प	प	प	प	प	प	ह	ह			रा	रा
रा					ह	प					प	ह					रा
						प					प						
						प					प						
रा					ह	प					प	ह					रा
रा	रा			ह	ह	प	प	प	प	प	प	ह	ह			रा	रा
रा	रा	रा	ह	ह	का	ह	ह			ह	ह	का	ह	ह		रा	रा
रा	रा	ह	ह	का	ह	ह					ह	ह	का	ह	ह	रा	रा
रा	ह	ह	का	ह	ह							ह	ह	का	ह	ह	रा
ह	ह	का	ह	ह	रा							रा	ह	ह	का	ह	ह
	का	ह	ह	रा	रा	रा					रा	रा	रा	ह	ह	का	
		ह	रा	रा	रा	रा	रा			रा	रा	रा	रा	रा	ह		

का रा से

से रा का

से
रा
का